
# श्रीनारायणगुरुदर्शनम्

## Skill Enhancement Course for BA Sanskrit Programme



# Self Learning Material

**B21SN01SE**

SGOU

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**
The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to scientific and value-based quality higher education, research and training to ensure equity in its process and outcome fostering educational empowerment for social advancement.*

## Mission

* To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode through approved quality education, training and research for normal, continuing, and adult learners.

* To democratize lifelong continuous education, skilling and upskilling, and training for all regardless of their economic status.

* To foster inclusiveness in quality education by bringing economically and socially weaker sections under the quality higher education framework without gender, religious, and regional discriminations.

* To provide access to quality higher education for potential learners without formal prerequisites.

## Pathway

Access and Quality define Equity.

SGOU

# श्रीनारायणगुरुदर्शनम्

Course Code: B21SN01SE

Semester -III

## Skill Enhancement Course
## BA Sanskrit Language and Literature
## Self Learning Material

SGOU

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

B21SN01SE
श्रीनारायणगुरुदर्शनम्
Semester III

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.
www.sgou.ac.in

ISBN 978-81-966440-2-4

# DOCUMENTATION

## Academic Committee

Dr. C.T. Francis (Chairman)
Dr . Jeena George
Dr. Geetha H.
Dr. J.P. Prajith
Dr. K. Retheesh
Dr. M. Harinaryanan Mankulathillath
Dr. P.K. Somarajan
Dr. Smitha Sabu
Dr. Susanth S.
Dr. Thara K.V.
Major K.S. Narayanan
Uma A.K.

## Development of the content

Ratheesh E.R., Aryamol S.E.

## Review

Content : Dr. C.T. Francis
Format : Dr. I.G. Shibi
Linguistics : Dr. C.T. Francis

## Edit

Dr. C.T. Francis

## Scrutiny

Dr. Vincent B. Netto, Chitra Bhaskar, Dr. Vijayarajan K.U., Dr. Jothilekshmi M., Dr. Sreeja J., Anju J.

## Co-ordination

Dr. I.G. Shibi and Team SLM

## Design Control

Azeem Babu T.A.

## Production

October 2023

## Copyright

© Sreenarayanaguru Open University 2023

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear,

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum ‘access and quality define equity’. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centres around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavours.

Sreenarayanaguru Open University rests on the practical framework of the popularly known “blended format”. Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning experience. The UG programmes are benchmarked with similar programmes of other state universities in Kerala. The curriculum follows the UGC guidelines of having three disciplines in a bundle with an impressive spread of other academic components. Skill Enhancement Courses occupy the curriculum of the UG programme with a view to expose the learner to discipline specific skills. This is an important step of the university to provide new experiences of vibrant content of the discipline. The details have been designed at par with similar courses of other premier institutions imparting skill training. We assure you that the university student support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.

Wish you the best.



01.10.2023

Regards,
Dr. P.M. Mubarak Pasha

SGOU

# C O N T E N T S

## Table of Contents

**Block-1**श्रीनारायणगुरोः जीवनं, योगदानं, कृतयश्च। अध्यारोपदर्शनम्, अपवाददर्शनम्, असत्यदर्शनम् च। ............. 1

Unit-1 श्रीनारायणरगुरोः जीवनं, योगदानं कृतयश्च ............ 2

Unit - 2 अध्यारोपदर्शनम् ............ 10

Unit - **3** अपवाददर्शनम् ............ 18

Unit - 4 असत्यदर्शनम् ............ 27

**Block-2** मायादर्शनम्, भानदर्शनम्, कर्मदर्शनम्, ज्ञानदर्शनम् च। ............ 36

Unit -**1** मायादर्शनम् ............ 37

Unit - **2** भानदर्शनम् ............ 45

Unit - 3 कर्मदर्शनम् ............ 54

Unit - 4 ज्ञानदर्शनम् ............ 62

SGOU

BLOCK -1

# श्रीनारायणगुरोः जीवनं, योगदानं, कृतयश्च।

# अध्यारोपदर्शनम्, अपवाददर्शनम्, असत्यदर्शनम् च।

SGOU

# Unit-1
# श्रीनारायणरगुरोः जीवनं, योगदानं कृतयश्च

## उद्देश्यानि (Learning Outcomes)

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः।
- श्रीनारायणगुरुग्रन्थद्वारा दार्शनिकावबोधः।
- अद्वैतवेदान्तसिद्धान्तेषु श्रीनारायणगुरोः वीक्षणावगतिः।
- अद्वैतवेदान्तसिद्धान्तोपरि विमर्शनात्मकचिन्ताविकासः।

## प्राग्व्यपेक्षाः (Pre requisites)

भारतीयदार्शनिकमण्डले एवं सांस्कृतिकसामाजिकमण्डले च योगदानकृतेषु वीरपुरुषेषु प्रथमगणनीयः भवति गुरुदेवः श्रीनारायणः। केरळराज्यस्य अद्यतनसांस्कृतिकसामाजिकसमृद्धेः, गतशतकीयसामाजिकव्यवस्थायाः च तुलनात्मकाध्ययनेन एव अद्वैताचार्यस्य श्रीनारायणगुरोः प्रवर्तनेन संजातस्य नवोत्थानस्य विस्तारः विस्तीर्ण इति ज्ञातुं शक्यते। केरळस्य कलुषितसामाजिकव्यवस्थायाः परिवर्तनं गुरुणा कृतमित्यतः गुरोः आन्तरीयशक्तेः अपारतां च दर्शयति। संस्कृते कैरल्यां तमिल्भाषायाञ्च विरचितासु कृतिषु उपनिषदां दर्शनवैमल्यं शास्त्रानुगतो निष्कर्षश्च साहित्येन विराजते। गुरुदेवस्य संस्कृतकृतिषु प्रामुख्येन परिगण्यते दर्शनमाला। अत्र तावदद्वैतदर्शनं पक्षप्रतिपक्षाभ्यां निर्णयनमिति संप्रदायो नैवाश्रितो दृश्यते। भारतस्य चिन्तासरण्यां अनन्यस्पृष्टा काऽपि शैली प्रकृतनिबन्धे समाहता परिदृश्यते। सत्यभूतमद्वैतं भिन्नैर्दशभिर्मुखैरवतारयितुं गुरुदेवस्य समुद्यमः सफलो वरावर्ति। सर्वतन्त्रस्वतन्त्रतया गुरुदेवस्य कृतिरियं अत्र अध्ययनं कुर्मः।

## मुख्यपदानि (Key words)

श्रीनारायणगुरुः, दर्शनमाला, कृतयः, कर्मपन्थिः,योगदानम्, अद्वैतदर्शनम्

### Discussions

## 1.1.1 श्रीनारायणगुरोः जीवनम्

केरलराज्ये जातिमतभेदः पराकाष्टतां गते काले नारायणगुरुः इति दार्शनिकः समाजसुधारकः उदीत्य समाजस्य तारतम्यं न्यूनीकर्तुं स्वजीवनं व्यतीतवान्। अनेन प्रतिपादितं तत्त्वं तु जगति "एका एव जातिः एकम् एव मतम् एकः एव देव" इति। एषः संस्कृतभाषायाम् अपि पण्डितः आसीत्। केरलसमाजे अस्पृशता इति सामाजिकानर्थस्य परिहारं स्वस्य विशेषशैल्या दृष्टवान्। देशसेवा एव ईशसेवा इति उपदेशं दत्तवान्।

केरलराज्यस्य तिरुवनन्तपुरं जनपदस्य चेम्पषन्ती नाम ग्रामस्य तीया इति कुलस्य माटन् आशान्, कुट्टिअम्माल् इति दम्पत्योः पुत्रः नारायणः। मलयालपञ्चाङ्गानुगुणं श्रीनारायणगुरुः कोल्लवर्षे १०३१ वर्षस्य सिंहमासस्य १४ दिनाङ्के पञ्चमहायोगयुक्त शतभिषानक्षत्रे अजायत इति स्थलीयानां विश्वासः। एतद्दिनं क्रिस्तीयदिनदर्शिकानुगुणं १८५५ तमवर्षस्य आगस्त् मासस्य २८ दिनाङ्कमिति निश्चितं भवति। तदा केरलराज्ये नैकाः जातयः नैकानि मतानि आसन्। उन्नतजातिः नीचजातिः अस्पृश्यता इत्यादीनि सामाजिकानिष्टानि सर्वत्र जनान् पीडयन्ति स्म। तस्मिन् कालखण्डे गुरुदेवः नारायणः अस्य समूलविनाशाय शपथं कृतवान्। भगवतः नाम्नि प्राणिहत्या विरोधितवान्। सामाजिकविरोधाभासान् नियन्त्रितुम् अनेकानि आन्दोलनानि कृतवान्। समाजस्य नीचजातीयजनानां मन्दिरप्रवेशनिषेधं विरुध्य आन्दोलनं विप्लवं वा न कृतवान्; किन्तु नूतनदेवालयान् निर्मितवान् यत्र सर्वेषां प्रवेशावकाशः कल्पितः। आकेरलं ६० सङ्ख्याधिकानि मन्दिराणि अस्थापयत्।

## 1.1.1.2 कर्मपन्थिः

### 60 मन्दिराणांप्रतिष्ठापनम्

अस्यां योजनायां प्रथमतया प्रकल्पः लिङ्गप्रतिष्ठापनम्। क्रि. श. १८८८ तमे वर्षे अरुविप्पुरम् इति प्रदेशे लिङ्गप्रतिष्ठापनम् अभवत्। क्रि.श. १९२२ तमे वर्षे अन्यदेकं न्यूतनविधानं समाजे आनीतवान्। समाजस्य सर्वे बान्धवाः एकत्र मिलित्वा सहभोजनम् आयोजितवान्। अस्पृश्यान् पञ्चवर्तिवर्गं सङ्घाट्य, परोपकारः एव स्वस्य जीवनध्येयः इति प्रदर्शितवान्। केचन मतान्तरम् एव परिहारः इति अवदन्, किन्तु नारायणगुरुः एतत् नाङ्गीकृतवान्। आलुवा इति स्थाने क्रि. श. १९२४ तमवर्षस्य फेब्रवरिमासे दिनद्वयस्य सर्वमतसम्मेलनम् आयोजितवान्। ब्रह्मविद्यालयः इति संस्थाम् आरभ्यतत्रसर्वधर्ममतानांविषयेअध्ययनस्य अवकाशः परिकल्पनीयः इति उत्कटेच्छा आसीत्। किन्तु अस्य जीवितावधौ सा साकारा नाभवत्। गुरोः कालानन्तरं शिष्याः अनुयायिनः च तस्य स्वप्नं साकारम् अकुर्वन्। विश्वस्य विविधदेशेषु पर्यटनं कृत्वा विश्वमानवतत्त्वं च बोधयित्वा गुरोर्दर्शनं प्रचारितवन्तश्च। गुरुः अनेकैः संन्यासिभिः महर्षिभिः च निरन्तरं निकटं सम्पर्कं संरक्षितवान्। देवस्य सेवां करोति चेत् अनेकेषां माङ्गल्यं भवति। अतः देशसेवा एव ईशसेवा, एतयोः समन्वयः जीवनम् इति एतादृश्यः अस्य सदुक्तयः अद्यापि अनुसरणयोग्याः सन्ति।

## 1.1.2 श्रीनारायणगुरोः योगदानम्

श्रीनारायणगुरोः दर्शनं श्रीशङ्कराचार्येणाविष्कृतम् अद्वैतदर्शनमेव। तथाहि गुरुणा तत् दर्शनं प्रायोगिकजीवनस्य उदीस्यर्थं प्रचारितमिति तस्य महत्वम्। गुरुणा सामूहिकपरिवर्तनं कर्तुं एकः उपाधिः इव अद्वैतदर्शनस्य विनियोगः कृतः। न केवलं मनुष्यस्य किन्तु सर्वजीवजालस्यापि वैजात्यं केवलम् उपरिप्ळवबुद्धेः एव, अन्तरात्मदृष्ट्या वयं सर्वेऽपि एकसत्यमेव इत्यादि अन्तर्दृष्टिः एव वस्तुतया अद्वैतमिति कथ्यते। समत्वम्,

साहोदर्यम्, स्नेहः इत्यादीनि महत्तराणि मूल्यानि अस्माकम् अन्तरात्मनि सहजान्येवेति अद्वैतम् अस्मान् पाठयति। तथा सर्वानपि एकीकर्तुं, समदृष्टिभावनां कर्तुं योग्यं दर्शनं भवति अद्वैतदर्शनम्।

गुरोः दर्शने द्राविडसंस्कारस्य अंशोऽपि द्रष्टुं शक्यते, प्रधानतया शैवसिद्धान्तस्य। परमतत्त्वं ब्रह्म निर्गुणम् इति तत् केवलं शून्यमिति नास्ति, प्रत्युत मनसि वयं यत् चिन्तयामः तत् तस्मिन् प्रतिभातीत्येवार्थः। ब्रह्म अनिर्वचनीयम् दुर्विज्ञेयम् च। तस्य याथार्थ्यं सत्वमीमांसा परः उद्देश्यवादपरः च भवति।

जीवब्रह्मैक्यनिरूपणं द्वैतनाशनम्च अहंबोधवर्धनार्थं न, प्रत्युत आत्मसाक्षात्कारार्थं आत्मार्पणार्थं च भवति। तदा एव ब्रह्मविद् ब्रह्म भविष्यति। याथार्थ्यस्य सत्वं सत्वमीमांसापरम्, अन्तर्वृत्तिपरम्, अनुभवातीतपरं, उद्देश्यपरं च इति विभक्तुं शक्यते। परमतत्त्वं दार्शनिकदृष्ट्या ज्ञानं, मनःशास्त्रदृष्ट्या आत्मा, ब्रह्माण्डशास्त्रदृष्ट्या परमदिव्यत्वं, सदाचारधर्माचारदृष्ट्या साहोदर्यं च भवति। तथा एकमपि सत्यं विभिन्नरूपेषु भावेष्वपि द्रष्टुं कश्चित् विरोधो नास्त्येव। ब्रह्म तत्, एतत् इति विकल्पासाध्यमपि गुरुणा 'अहम्' इति प्रतिपादितम्। 'अहम्' इति भावः निषेधितुम् न शक्यः। श्रीनारायणगुरोः अद्वैतशास्त्रविचारे मानुषिकमूल्यस्यापि परमप्राधान्यं दत्तमस्ति। भूतदया, समदृष्टिः स्नेहः इत्यादिषु मानुषिकमूल्येषु यादृशी श्रद्धा गुरुणा दत्ता तादृशी श्रद्धा आचार्यान्तरैः दत्ता न वा इति आशङ्का अस्त्येव। मानवस्य अनिवार्यं मूल्यं भवति जीवकारुण्यम्। तदेव अद्वैतमपि अस्मान् पाठयति। न केवलं बौद्धिकममूर्तं भवति परमसत्यं, प्रत्युत महत्तरम् एकं मूल्यं च तत्।

आत्मब्रह्मणोः अभेदमेव अद्वैतस्य विषयः। वेदान्ते ब्रह्म आत्मशव्देन अपि व्यवह्रियते। श्रीनारायणगुरोः कृतिषु आत्मशब्दस्य प्रयोगः एव दरीदृश्यते। सर्वज्ञानानां आधारः आत्मज्ञानमेव। आत्मज्ञानमेव अन्यसर्वज्ञानस्यापि मार्गदर्शकः। गुरोः वचने निजबोध: भवति 'आत्मा'। सर्वजीवजालानां परमसत्यं स एव भवति। आत्मा एव गुरुणा 'ज्ञानम्' इति कथ्यते। ज्ञानप्रतिपादककविता अपि गुरुणा विरचिता। गुरुणा तस्य 'आत्मोपदेशशतके' (कैरल्याम्) अपि 'आत्मा' इति तत्त्वं प्रतिपादितमस्ति। आत्मा स्वयंज्योतिः भवति। तमेव भान्तम् अनुभाति सर्वम्। तस्य भासा सर्वमिदं जगत् विभाति। प्रपञ्चे वैविध्यरूपेण येषाम् उपलब्धिः भवति तेषां सर्वेषाम् अधिष्ठानं भवति आत्मा।

यद्यपि प्रपञ्चः अयथार्थः तथापि तस्य व्यावहारिकरूपेण सत्यत्वं वेदान्ते स्वीकृतम्। 'ब्रह्म सत्यं जगन्मिथ्या' इति श्रीशङ्करवचनम्। मायावादः इति शाङ्कराद्वैतस्य अपरं नाम। याथार्थ्यं श्रीशङ्करेण पारमार्थिकं, व्यावहारिकं प्रातिभासिकं इति त्रिधा विभक्तं भवति। पारमार्थिकसत्ता ब्रह्मण एव। व्यावहारिकसत्ता तु अनुभवसिद्धस्य प्रपञ्चस्य। प्रातिभासिकसत्ता व्यावहारिकज्ञानेनैव बाध्यमानस्य स्वपानादिदृश्यस्य च भवति। प्रपञ्चानुभवः ब्रह्मानुभववत् पारमार्थिकः नप्रातिभासिकः अपि न। अत एव जगन्मिथ्या इति निर्देशः। सदसद्भ्याम् अनिर्वचनीयं भवति मिथ्यात्वम्। तदेतत् भौतिकप्रपञ्चस्य सविशेषता।

SGOU

यद्यपि जगत् अयथार्थं तथापि व्यावहारिकसत्तायां चेतनायुक्तस्य मनुष्यस्य कृते तस्य अर्थक्रियाकार्यसत्वम् अस्तीत्यतः प्रसक्तिरस्त्येव।

अद्वैतशास्त्रमनुसृत्य परमपुरुषार्थः मोक्षः भवति। ब्रह्मज्ञानमेव मोक्षः। जीवब्रह्मैक्यसाक्षात्कारमेव मोक्षः। यद्यपि आत्मस्वरूपं नित्यमुक्तं तथापि अज्ञानेन बद्धमिव प्रतिभाति। यथा प्रकाशेन अन्धकारस्य नाशः तथा ज्ञानेन अज्ञाननाशः भवति। यदा ज्ञानेन अज्ञाननिवृत्तिः भवति तदा ब्रह्मभावः आविर्भवति। वस्तुतः प्राप्तस्य प्राप्तिरेव मोक्षः न अप्राप्तस्य प्राप्तिः। ज्ञानेनैव बन्धकारणस्य अज्ञानस्य नाश इत्यतः ज्ञानमेव मोक्षकारणं भवति। किन्तु कर्ममार्गस्य तथा भक्तिमार्गस्य च ज्ञानोत्पत्तौ हेतुत्वात् तयोः स्वीकारः अद्वैतसम्मतः। यदा ब्रह्मज्ञानप्राप्तिः तदैव मोक्षः। किन्तु यावत्प्रारब्धकर्मक्षयः तावत् शरीरधारणं प्रपञ्चवासश्च सम्भवति। ज्ञानिनः इयं दशा जीवन्मुक्तिरित्युच्यते। जीवन्मुक्तिदशायां जीवन्मुक्तस्य कर्तव्यं किमपि नास्ति तथापि लोकसंग्रहार्थं प्रवृत्तिः भवति। सामाजिकमण्डलस्य उद्धारणाय जीवन्मुक्तस्य व्यवहाराणामुपयोगः अनिवार्य इति गुरोः चिन्ता आसीत्। गुरोः मते समत्वम्, स्नेहः, साहोदर्यम् इत्यादीनि उत्तममूल्यानि जीवने अत्यन्तमावश्यकानि। स्वात्मानमिव परे अपि श्रद्धा करणीया। सर्वजीवजालेषु वर्तमानं चैतन्यमेकमेव इति अवबुद्ध्य लोकसंग्रहार्थं जीवितानुष्ठानमस्माकं कर्तव्यम्। एषः भवति गुरोः प्रायोगिकवेदान्तः। स्वामिविवेकानन्दस्य प्रायोगिकवेदान्तः इव श्रीनारायणगुरोः प्रायोगिकवेदान्ते अपि मानुषिकमूल्यानां प्राधान्यमस्ति।

## 1.1.3 श्रीनारयणगुरोः कृतयः

श्रीनारायणगुरुदेवः कैरलयां गैर्वाण्याञ्च स्तोत्राणि गीतानि च व्यरचयत्। तेष्वन्यतमम् अतिविश्रुतं कुण्डलिनीगीतम् (कै)। दैवदशकम् (कै) अद्वैतदीपिका (कै), जननीनवरत्नमञ्जरी (कै), आत्मोपदेशशतकम् (कै), दर्शनमाला(सं), मुनिचर्यापञ्चकम् (सं), ब्रह्मविद्यापञ्चकम्(सं) इत्यादयश्च मुख्याः अस्य कृतयः।

गुरोः प्रथमकालकृतयः प्रधानतया भक्त्युद्दीपकानि स्तोत्राणि भवन्ति। क्षेत्रबिंबप्रतिष्ठापनानुबन्धकाले एव प्रायेण एतानि स्तोत्राणि विरचितानि। श्रीवासुदेवाष्टकम् (सं) विनायकाष्टकम् (सं) गुहाष्टकम् (सं), षण्मुखदशकम् (कै) सुब्रह्मण्यकीर्तनम् (कै), जननीनवरत्नमञ्जरी (कै), भद्रकालष्टकम् (सं), देवीस्तवम्(कै) मण्णन्तलदेवीस्तवम् (कै), कालीनाटकम्(कै) चिदम्बराष्टकम् (सं), शिवप्रसादपञ्चकम् (कै), सदाशिवदर्शनम् (कै) शिवशतकम् (कै) अर्धनारीश्वरस्तवम् (कै) कुण्डलिनीगीतम् (कै) इत्यादयाः स्तोत्राणि गुरोः आरम्भकालकृतिषु अन्तर्भवन्ति।

द्वितीयखण्डे गुरुणा रचिताः कृतयः तस्य आत्मीयानुभूतयः चित्रीकुर्वन्ति। अद्वैतदीपिका (कै), स्वानुभवगीती (कै) इत्यादयाः तेषु अन्तर्भवन्ति। दर्शनमाला (सं) आत्मोपदेशशतकम्(कै) दैवदशकम् (कै) ब्रह्मविद्यापञ्चकम् (सं), मुनिचर्यापञ्चकम् (सं), अरिव्(कै) इत्यादयः तस्य मुख्यदार्शनिककृतयः भवन्ति। एतान् विहाय जीवकारुण्यपञ्चकम् (कै), अनुकम्बादशकम् (कै), जातिनिर्णयम् (कै), सदाचारम्(कै), आश्रमम् (सं) इत्यादयः जनसामान्यानां कृते प्रदत्तानि बोधनानि भवन्ति।

एतान् सर्वान् अपि विहाय गुरुणा "ईशावास्योपनिषत्" संस्कृतात् कैरलीभाषायां तथा "तिरुक्कुरल्" इति तमिल् भाषा ग्रन्थस्य कानिचन पाटला: कैरलीभाषायां च विवर्तितवान्।
(कै) - कैरल्याम् (सं) – संस्कृते

## 1.1.4 दर्शनमाला

श्रीनारायणगुरोः दार्शनिकग्रन्थेषु दर्शनमाला अतीव प्राधान्येन परिगण्यते। श्रीशङ्करस्य अद्वैतदर्शनमाधारीकृत्य स्वाभिप्रायानां च मेलनं कृत्वा गुरुणा ग्रन्थः विरचितः। अद्वैतसिद्धान्तानां दशमुखवीक्षणेन दशाध्यायेषु प्रतिपादनं दर्शनमालायाम् गुरुणा कृतम्। श्रीनारायणगुरुः स्वीयं आत्मतत्त्वदर्शनं सांप्रदायिकपथेनैव दर्शनमालायां सुष्ठु विवृणोतीति सुविदितम्। नैषा कृतिरास्तिकनास्तिकदर्शनानि क्रोडीकृत्य विरचिता; किंतु तदद्वयमेकं ब्रह्मसत्यं बहुमुखवीक्षणैः प्रकाशयन्तीयं दशदर्शनकुसुमानि सम्यगेकीकृत्य पुष्पदामेव भाति।

तदेकमपि वस्तु रीतिभेदैर्वैविध्येन द्रष्टुं कल्पयितुं च शक्यं विविधवास्तुकलाभासुरं किमपि क्षेत्रं दिशाभेदेन विभिन्नाकारं प्रतीयते तथैव जिज्ञासुभिः प्राप्यं परमलक्ष्यं एकमेव ब्रह्म दशभिर्वीक्षणैर्दृश्यमानमपि पार्यन्तिकत्वेनैकमेव। अचञ्चलया अन्तर्दृष्ट्या ब्रह्मणः प्राप्तिरिति सुनिश्चिता एव ।

श्रीमन्नारायणगुरुणा वेदान्तलोके दर्शितोऽयं अभिनवः पन्थाः - अध्यारोपः, अपवादः, असत्यम्, माया, भानम्, कर्म, ज्ञानम्, भक्तिः, योगः निर्वाणम् इति तानि दर्शनानि। प्रथमतः अध्यायतः पञ्चमाध्यायपर्यन्तं प्रपञ्चाधारतत्त्वं किमिति विविधरीत्या चेतयते| षष्ठतः दशमाध्यायपर्यन्तं साधकस्य अनुभूतिवर्णनस्य एव प्रथमस्थानम्। दशभिरेभिर्दर्शनैरुत्ग्रथिता मालेयम्। तस्याः स्रजः स्वायत्तं घटनारूपमस्ति। उभयोः कोट्योरायोजनेनैव सा कण्ठे धर्तुं शक्यते। दर्शनमालाया अपि उभयकोटियोजनमवश्यं कर्तव्यम्। कुतोऽयं प्रपञ्चः समजनीति प्रबोधयन् गुरुरुपदेशमारभते। अपि च पुनरावृत्तिरहितं सर्वमिदं एकस्मिन् ब्रह्मणि विलीयत इति स्फुटीकृत्य विरमति चात्मारामः।

सर्वाण्यपि स्वप्नदृश्यान्युपबोधमण्डलादुद्भूतानि। तान्येव जागरितावस्थायां तत्र बोध एव विलीयन्ते। तथा ब्रह्मणि प्रतीतः अयं प्रपञ्चानुभवः तदभावे ब्रह्मण्येव विलीयते। एषा चिन्तागतिरेव विद्यते दर्शनमालायाम्। अत्र उभयकोटिसम्मिलितःसत्यसाक्षात्कारः।

सर्वासामपि गुणनिकानां मध्ये अस्ति चकास्ति कोऽपि नायकमणिः। तथा दशदशकसंपुष्टायाम् अविलष्टायां दर्शनमालायामपि विद्यते कोऽप्यद्भुतावहो मध्ये महामणिः। अस्यां मणिशतकसम्मिलितायां पञ्चाशत्तमस्थानीयः श्लोको नायकायते। अत्र भासमानं ओं तत्सदिति महावाक्यं चैतन्यमिव प्रसरत्यामूलशिखरमस्याम्। अपि च कश्चिदपरः सूक्ष्मतरो मध्यममणिः अस्यां निगूहित इति सूक्ष्मदृग्भिर्ज्ञेयम्। अत्र पञ्चमदशकचतुर्थपादान्तर्गतं तदित्यक्षरं ब्रह्म लक्षयति। तथा षष्ठदशकस्यादिमं पदं आत्मेति भवति। तदा पूर्वोत्तरयोरुभयोः श्लोकयोः “तदात्मा” इति संयोज्य ब्रह्मात्मनोरैक्यं निगूढत्तरं उद्घोषितमिति मन्यामहे।

अध्यारोपादिभिर्निर्वाणान्तैर्दशभिर्दर्शनैः पुष्पत्वेनाध्यवसितैर्निबद्धा माला भवति दर्शनमाला। 'दृशिर् प्रेक्षणे' इति धातोर्भावार्थे ल्युटि निष्पन्नो दर्शनशब्दः प्रेक्षणविशेषं प्रतिपादयति। दृश्यते अनेनेति दर्शनमिति करणप्युत्पत्तौ दर्शनशब्दः शास्त्रार्थको भवति।

## पुनरावृत्तिः (Recap)

- एका एव जातिः, एक एव धर्मः, एकः एव देवः।
- नारायणगुरोः जननम्, नवोत्थानम्, प्रवर्त्तनानि।
- नारायणगुरोः दर्शनम्।
- नारायणगुरोः मते अद्वैतदर्शनम्।
- नारायणगुरोः प्रयोगिकवेदान्तः।
- नारायणगुरोः कैरलीकृतयः।
- नारायणगुरोः संस्कृतकृतयः।
- नारायणगुरोः अन्यकृतयः।
- दर्शनमाला।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. नारायणगुरोः प्रमुखः उद्घोषः कः?
2. गुरोः जन्म कुत्र आसीत्?
3. कयोः पुत्रः श्रीनारायणगुरुदेवः?
4. कति मन्दिराणि गुरूदेवेन प्रतिष्ठितानि?
5. प्रथमं लिङ्गप्रतिष्ठापनं कदा कुत्र आसीत्?
6. गुरुदेवेनारब्धायाः संस्थायाः नाम किम्?
7. नारायणगुरोः दर्शनं किमासीत्?
8. गुरुणा कति कृतयः विरचिताः?
9. कति कैरलीकृतयः सन्ति?
10. कति संस्कृतकृतयः सन्ति?
11. नारायणगुरुः कस्यामुपनिषदामुपरि विवर्त्तनमरचयत्?

SGOU

12. दर्शनमालायां कति दर्शनानि सन्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. गुरोः प्रायोगिकवेदान्तः कीदृशः?
2. गुरोः कति कृतयः सन्ति? कानि च तानि?
3. दर्शनमालायाः दशदर्शनानि कानि?
4. गुरोः जन्म कदा अभवत्?
5. नारायणगुरोः कैरलीकृतयः काः?

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. गुरोः योगदानं विशदयत।
2. नारायणगुरोः जीवनं निरूपयत।
3. नारायणगुरोः प्रधान कृतयः काः?

## निर्दिष्टाभ्यासाः (Assignments)

1. गुरोः जीवनं, कृतयः च विशदयत।
2. नारायणगुरोः योगदानं प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. एका एव जातिः, एक एव धर्मः, एकः एव देवः।
2. चेम्पषन्त्याम्।
3. माटन् आशान्, कुट्टिअम्माल् दम्पत्योः।
4. षष्टिः
5. क्रि. श. 1888 तमे वर्षे , अरुविप्पुरम्।
6. ब्रह्मविद्यालयः

SGOU

7. अद्वैतदर्शनम्।
8. षट्त्रिंशत्
9. अष्टादश
10. अष्ट
11. "ईशावास्योपनिषत्"
12. दश

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु
3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यू डेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यू डेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962


## अधिकवाचनग्रन्थौ (Suggested Readings)


1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।
2. दर्शनमाला ( जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः।

# Unit - 2
# अध्यारोपदर्शनम्

## उद्देश्यानि (Learning Outcomes)

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः।
- श्रीनारायणगुरुग्रन्थद्वारा दार्शनिकावबोधः।
- अद्वैतदर्शनस्य अध्यारोपज्ञानं प्राप्नोति।

## प्राग्व्यपेक्षाः (Pre requisites)

गुरुदेवस्य संस्कृतकृतिषु प्रामुख्येन परिगण्यते दर्शनमाला। अद्वैतसिद्धान्तानां दशमुखवीक्षणेन दशाध्यायेषु प्रतिपादनं दर्शनमालायाम् गुरुणा कृतम्। श्रीनारायणगुरुः स्वीयं आत्मतत्त्वदर्शनं सांप्रदायिकपथेनैव दर्शनमालायां सुष्ठु विवृणोतीति सुविदितम्। प्रथमतः अध्यायतः पञ्चमाध्यायपर्यन्तं प्रपञ्चाधारतत्त्वं किमिति विविधरीत्या चेतयते| अत्र प्रथम दर्शनस्य अध्यारोपदर्शनमिति संज्ञा कृता। यथा- अयं प्रपञ्चो ब्रह्मण्यध्यारोपिता भवति न वस्तुतः। स्वप्नः, मायावि, बीजाङ्कुरः, चित्रकारः, योगी, वेतालनगरी, सुप्तिः, धाना, इति बहुभिः दृष्टान्तैः अयमात्मैव सृष्टिस्थितिलयान्तरैः परिवर्त्तमानः सर्वमिदं भासयन्भातीति। अस्मिन् दर्शने स्पष्टमाचष्टे गुरुः। अस्मिन् प्रकृते क्रमसृष्टिवादगतिं निराकरोति। तथा युगपत्सृष्टिवादस्य स्वीकृतमपि विधते। एवं दृश्यादृश्येऽस्मिन् प्रपञ्चे विद्याविद्याख्ये उभे अङ्गे इव वर्तते। अथ सदसद्रूपं सर्वमिदं ब्रह्मण्यध्यारोपितमिति चिन्तागतिं अङ्गीकरोति।

## मुख्यपदानि (Key words)

अध्यारोपं, सत्, असत्, जगत्, आत्मतत्वम्, सच्चिदानन्दस्वरूपम्।

## Discussion

तत्र प्रथममध्यारोपदर्शनम्। अध्यारोपो नाम अतस्मिंस्तत्वाध्यासः। सच्चिदानन्दस्वरूपे ब्रह्मणि नामरूपात्मकमिदं जगदनाद्यविद्यया अध्यस्तं भवति। विद्यया त्वविद्यानिवृत्तौ तत्कार्यं जगदपि निवर्तते। तदिदं दर्शनमस्मिन् भागे निरूपयति।

**अध्यारोपदर्शनम्**

**आसीदग्रे असदेवेदम् भुवनं स्वप्नवत्पुनः।**
**ससर्ज सर्वं सङ्कल्पमात्रेण परमेश्वरः॥ (१)**

**वासनामयमेवादावासीदिदमथ प्रभुः।**
**असृजन्मायया स्वस्य मायावीवाखिलं जगत्।।(२)**
**प्रागुत्पत्तेरिदं स्वस्मिन् विलीनमथ वै स्वतः।**
**बीजादङ्कुरवत्स्वस्य शक्तिरेवाऽसृजत्स्वयम्।।(३)**
**शक्तिस्तु द्विविधा ज्ञेया तैजसी तामसीति च।**
**सह्वासोऽनयोर्नास्ति तेजस्तिमिरयोरिव।।(४)**
**मनोमात्रमिदं चित्रमिवाग्रे सर्वमीदृशम्।**
**प्रापयामास वैचित्र्यं भगवान् चित्रकारवत्।।(५)**
**आसीत् प्रकृतिरेवेदं यथाऽदौ योगवैभवः।**
**व्यतनोदथ योगीव सिद्धिजालं जगत्पतिः।।(६)**
**यदाऽत्मविद्यासंकोचस्तदाऽविद्या भयंकरम्।**
**नामरूपात्मनाऽत्यर्थं विभातीह पिशाचवत्।।(७)**
**भयमकरमिदं शून्यं वेतालनगरं यथा।**
**तथैव विश्वमखिलं व्यकरोदद्भुतं विभुः।।(८)**
**अर्काद्यथाक्रमं विश्वं तथा नैवेदमात्मनः।**
**सुप्तेरिव प्रादुरासीद्युगपत्स्वस्य वीक्षया।।(९)**
**धानादिव वटो यस्मात् प्रादुरासीदिदं जगत्।**
**स ब्रह्मा स शिवो विष्णुः स परः सर्व एव सः।।(१०)**

अग्रे सृष्टेः पूर्वम् इदं भुवनं असदेव आसीत्। पुनः,सृष्टिकाले,परमेश्वरः (सर्वशक्तः ईश्वरः) सर्वं (जगत्) स्वसंकल्पमात्रेण, संकल्पशक्त्या स्वप्नवत् ससर्ज।

**आसीदग्रे असदेवेदम् भुवनं स्वप्नवत्पुनः।**
**ससर्ज सर्वं सङ्कल्पमात्रेण परमेश्वरः।। (१)**

**अन्वयः-** अग्रे इदं भुवनम् असत् एव आसीत्। पुनः परमेश्वरः सर्वं संकल्पमात्रेण स्वप्नवत् ससर्ज।

स्वप्ने दृश्यमानपदार्थाः संकल्पमात्राः भवन्ति, तेषां वास्तविकसत्ता नास्ति खलु। तथैव इदं सर्वं जगदपि परमेश्वरस्य संकल्पमात्रं भवति, वस्तुतः न भवति। वास्तविकसत्ता ईश्वरस्यैव अस्ति।

'असद्वा इदमग्र आसीत'; 'ततो वै सदजायत' इति तैत्तिरियश्रुतेः।

'अग्रे' इत्यस्य पारमार्थिकावस्था, 'पुनः' इत्यस्य व्यावहारिकसत्ता च लक्ष्यते।

अनेन श्लोकेन वस्तुनिर्देशरूपं मंगलाचरणं क्रियते। 'अ'वर्णात् आरेभे इत्यतः मंगलं भवति एव। 'अक्षराणामकारोऽस्मि' इति भगवता श्रीकृष्णेन गीतायाम् अकारम् आत्मस्वरूपमिति रीत्या उक्तम्। 'आसीत्' इति प्रथमपदं सत्तावाचकमित्यतः अपि मंगलसूचकमेव। तदेवपदं अस्य शास्त्रस्य प्रतिपाद्यविषयमिव, तथा

नित्यमंगलस्वरूपं एकसद्वस्तुमनुस्मरतीत्यादि प्रकारेण च मंगलं निदर्शयति। 'ससर्ज सर्वं संकल्पमात्रेण परमेश्वरः' इत्यादिना, जगद्कर्तारम् ईश्वरम् अंगीकृत्य, स ईश्वरो सर्वशक्तः परमोत्कृष्टः इत्यादि प्रशंसया ईश्वरस्मरणारूपमंगलम् अन्तर्भावयतीति ज्ञायते।

असत् जगत् ईश्वरसंकल्पे किं रूपमाश्रित्य आसीत् इति निरूपयति-

**वासनामयमेवादावासीदिदमथ प्रभुः।**
**असृजन्मायया स्वस्य मायावीवाखिलं जगत्।।(२)**

**अन्वयः-** आदौ इदं वासनामयम् एव आसीत्। अथ प्रभुः स्वस्य मायया मायावी इव अखिलं जगत् असृजत्।

आदौ इदं (दृश्यप्रपञ्चः) वासनामयमेव आसीत्। अथ, सृष्टिकाले, प्रभुः (ईश्वरः) स्वस्य मिथ्यारूपशक्त्या मायया मायावी इव अखिलं जगत् असृजत्।

सृष्टेः प्राक् प्रपञ्चः केवलं संस्काररूपेण एव आसीत्। वासनायाः प्रवृत्तिरेव प्रथमश्लोकोक्तसंकल्पः। सृष्टिकाले ईश्वरः स्वस्य मिथ्यारुपया शक्त्या सर्वप्रपञ्चं असृजयत्। तत्कथमित्युक्ते, यथा ऐन्द्रजालिकः एकः असद्वस्तुं सत् इव करोति तथा एव। वस्तुतः पदार्थरहिता वासनाशाक्तिरेव हि एन्द्रजालिके वर्तते। तथैव ईश्वरादन्यः कोऽपि प्रपञ्चः नास्ति। केवलमायाशक्तिमात्रमेव निर्विशेषे ईश्वरे वासनारूपेण वर्तते। मायावीदृष्टान्तेन जगत् मिथ्या एवेति दर्शयति।

सा एव शक्तिः प्रपञ्चस्य सृष्टिहेतुः।

**प्रागुत्पत्तेरिदं स्वस्मिन् विलीनमथ वै स्वतः।**
**बीजादङ्कुरवत्स्वस्य शक्तिरेवाऽसृजत्स्वयम्।।(३)**

**अन्वयः-** इदम् उत्पत्तेः प्राक् स्वस्मिन् विलीनम् आसीत्। अथ वै बीजात् अङ्कुरवत् स्वतः स्वस्य शक्तिः स्वयम् एव असृजत्।

उत्पत्तेर्प्राक् इदं जगत् स्वस्मिन् ईश्वरे विलीनमासीत्। अथ वै बीजात् अङ्कुरवत् ईश्वरात् स्वतः स्वस्य शक्तिः स्वयमेव असृजत्।

इयं शक्तिः, नाशयुक्ता तथैव नानाविधवैचित्र्येन पुनरुत्पत्तिस्वभावयुक्ता च भवति। बीजात् अङ्कुरः, वृक्षः, शाखा, पत्रं, पुष्पं, फलमित्यादयः बिजान्तर्गता शक्तिरेव भवति। तथैव, ईश्वरः स्वस्य शक्त्या स्वयं जगद् सृजति। ईश्वरः निर्विकारः अपि मायया कार्यात्मना प्रपञ्चरूपेण प्रकटः भवति।

तां शक्तिं पुनरपि वर्णयति-

**शक्तिस्तु द्विविधा ज्ञेया तैजसी तामसीति च।**
**सहवासोऽनयोर्नास्ति तेजस्तिमिरयोरिव।। (४)**

**अन्वयः-** शक्तिः तु तैजसी तामसी च इति द्विविधा ज्ञेया। अनयोः तेजस्तिमिरयोः इव सहवासः नास्ति।

सा शक्तिः तु तैजसी तामसीति च द्विविधा ज्ञेया। अनयोः तेजस्तिमिरयोः इव सहवासः नास्ति। तेजः तैजसी अन्धकारः तामसी च कदापि युगपत् न भवतीति।

प्रपञ्चकारणमिति पूर्वोक्ताः सकल्पः, वासना, शक्तिः इत्यादयः केवलमनोरूपाः इति निरूपयति अग्रिमश्लोके-

**मनोमात्रमिदं चित्रमिवाग्रे सर्वमीदृशम्।**
**प्रापयामास वैचित्र्यं भगवान् चित्रकारवत्।।(५)**

**अन्वयः-** अग्रे मनोमात्रम् इदं चित्रम् इव ईदृशं सर्वं वैचित्र्यं चित्रकारवत् भगवान् प्रापयामास।
अग्रे मनोमात्रमिदं जगत्, चित्रकारवत् चित्रम् इव, भगवान् ईदृशं सर्वं वैचित्र्यं प्रापयामास।

सृष्टेः प्राक् अयं प्रपञ्चः केवलमनोरूपेण आसीत्। तद्कथमिव चेत्, चित्ररचनायाः पूर्वं चित्रकारस्य मनसि यथा आसीत्, तथैव अयं प्रपञ्चः सृष्टेः पूर्वम् ईश्वरस्य संकल्पे एव आसीत्। नानाविधवैचित्र्यैः चित्रं रचयितुं चित्रकारेण शक्यते। तथा, केनापि प्रकारेण वैचित्र्येन प्रपञ्चस्य सृष्टिं कर्तुम् ईश्वरेणापि शक्यते। अर्थात्, सर्वप्रपञ्चः ईश्वरस्य सङ्कल्पमाश्रित्यैव भवतीति तात्पर्यम्।

अग्रिमश्लोके मनसः प्रकृति इति संज्ञया निरूपयति, अन्यदृष्टान्तैः सृष्टिं च वर्णयति-

**आसीत् प्रकृतिरेवेदं यथाऽदौ योगवैभवः।**
**व्यतनोदथ योगीव सिद्धिजालं जगत्पतिः।।(६)**

**अन्वयः-** आदौ यथा योगवैभवः इदं प्रकृतिः एव आसीत्। अत योगी सिद्धिजालम् इव जगत्पतिः इदं व्यतनोत्।
आदौ इदं जगत् यथा योगवैभवः प्रकृति एव आसीत्। अथ, योगी सिद्धिजालम् इव जगत्पतिः इदं जगत् व्यतनोत्।

योगिनः योगवैभवः स्वस्य वासनारूपा प्रकृतिरेव भवति। संकोचविकासैः सह वर्तमाना मनोरूपा एका शक्तिः भवति। प्रकृतिरेवात्र निर्दिष्टा। अथवा मन एव प्रकृतिः, योगिना नानाविधैः सुविस्तारेण प्रकटमानं सिद्धिजालं, तस्य योगिनः स्वस्मिन् मनोरूपेणान्तर्गतप्रकृतेः विकसितरूपान्तरमेव भवति। तदेवप्रकारं, ईश्वरान्तर्गतप्रकृति एव दृश्यमानप्रपञ्चाकारेण विस्तृतरूपेण परिणमिता भवति।

पूर्वेक्ताः संकल्प-वासना-शक्ति-मन-प्रकृतिः इत्यादयः एकस्मिन्नर्थे प्रतिपादिताः भवन्ति। अग्रिमश्लोकस्य “अविद्या” पदमपि अस्मिन्नर्थे उपयुक्तम्।

यथार्थज्ञानराहित्येनैव जीवजालानां कृते इदं जगत् भयङ्करमिति भाति इति निरूपयति-

**यदाऽत्मविद्यासंकोचस्तदाऽविद्या भयंकरम्।**
**नामरूपात्मनाऽत्यर्थं विभातीह पिशाचवत्।।(७)**

**अन्वयः-** यदा आत्मविद्यासंकोचः तदा अविद्या नामरूपात्मना पिशाचवत् अत्यर्थं भयंकरम् इह विभाति।
यदा आत्मविद्यासंकोचः तदा अविद्या, अज्ञानं, नानाविधनामरूपात्मना पिशाचवत् अत्यर्थं भयङ्करं इह विभाति।

आत्मज्ञानस्याभावादेव, जीवजालाः, अयं प्रपञ्चः अस्तीति अनुभवन्ति तथा तस्मात् च भयदुःखादयः। आत्मनः यथार्थज्ञानेन सर्वदुःखानि, तेषामाधारस्य प्रपञ्चस्य प्रतीतिः च निश्शेषं नश्यति। निर्विशेषात्मसाक्षात्कार इति यथार्थज्ञानोत्पादकालपर्यन्तं दुःखनिवृत्तिर्न सिद्ध्यति। “बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्- पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिद्ध्यति।” इति श्रीशङ्करवचनमपि वर्तते। अनेन श्लोकेनापि, आत्मविद्यासंकोचनिमित्तमुत्पन्नभयदुःखादिभिः विमोक्तुं इच्छायुक्तः एव अस्य शास्त्रस्य अधिकारी इति, तथा आत्मविद्या एव अस्य प्रतिपाद्यविषयः इति, एवम् आत्मविद्यायाः अस्य शास्त्रस्य च

प्रतिपाद्यप्रतिपादकभावसंबन्धः अस्तीति च, तथा अविद्यादुःखात् अत्यन्तनिवृत्तिः, आत्मविद्योपलब्धिः परमानन्दप्राप्तिः च प्रयोजनमिति च सूचयन्ति। न केवलम् इहलोकवासिनामेव एवंप्रकारेण दुःखं स्यात्, किन्तु दृश्यादृश्येषु सर्वप्रपञ्चेषु सर्वेषामपि जीवराशिनामपि भयंकरेण नियमेन दुःखमिदं संभवति। प्रपञ्चम् ईश्वरेण तत्प्रकारादद्भुतशक्त्या एव कृतमिति अग्रिमश्लोके वदति-

**भयमकरमिदं शून्यं वेतालनगरं यथा।**
**तथैव विश्वमखिलं व्यकरोदद्भुतं विभुः।।(८)**

**अन्वयः-** इदं यथा वेतालनगरं भयंकरं शून्यं (च भवति) विभुः अखिलं विश्वं तथा एव अद्भुतं व्यकरोत्।

इदं दृश्यलोकं यथा वेतालनगरं भयंकरं शून्यं च भवति। विभुः अखिलं विश्वं तथा एव अद्भुतं व्यकरोत्। ईश्वरः सर्वशक्तः इत्यतः असत्यमिदं जगत् सत्यमिव आश्चर्येण व्यकरोत्। शून्यं तथापि भयंकरम् इत्यतः 'अद्भुतम्' इत्युच्यते। 'विभुः' इति पदं ईश्वरस्य सर्वव्यापकत्वं सर्वशक्तिमत्वम् अनादित्वं नित्यत्वं च द्योतयति।

इत्थंप्रकारसृष्टिः कथं संभवतीति क्रमः अग्रिमे श्लोके वर्णयति-

**अर्काद्यथाक्रमं विश्वं तथा नैवेदमात्मनः।**
**सुप्तेरिव प्रादुरासीद्युगपत्स्वस्य वीक्षया।।(९)**

**अन्वयः-** इदं विश्वं अर्कात् **यथाक्रमं** प्रादुरासीत्, तथा नैव। इदम् आत्मनः स्वस्य **वीक्षया** सुप्तः इव युगपत् प्रादुरासीत्।

इदं विश्वम् अर्कात् यथाक्रमं प्रादुरासीत् (इत्युक्ते) तथा नैव। इदं आत्मनः स्वस्य **वीक्षया**, सुप्तेः इव युगपत् प्रादुरासीत्।

आदौ सूर्यः अवर्तत इति, सूर्यात् आकाशः, आकाशात् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी इति यथाक्रमोत्पत्तिः प्रपञ्चस्य इति पौराणिकव्यवहारः वर्तते। तथा नैवेति। इदं जगत् व्यावहारिकदशायां दृश्यमानसर्वविधवैचित्र्यैः सह **आत्मसंकल्पेन** आत्मनः युगपत् प्रादुरासीत्। सृष्टेः प्राक् स आत्मा केवलः आसीत्। सुषुप्तितः जाग्रदवस्थायां प्राप्ते सति यथा सर्वं युगपत् प्रत्यक्षीभवन्ति, तथा एव सृष्टिकाले आत्मसंकल्पेन इदं जगत् सर्वं युगपत् आत्मनः प्रादुरासीत्। "तदैक्षत बहुस्यां प्रजायेयेति" इत्यादिश्रुतेः।

अत्र क्रमसृष्टिवादं निराकृत्य **समसृष्टिवादः** अङ्गीकरोति। युगपदेव प्रपञ्चं स्रष्टुं पर्याप्ता शक्तिरेव ईश्वरशक्तिः इति आन्तरार्थः।

अन्तिमे श्लोके तु ईश्वरस्य प्रपञ्चकार्यपरम् अभिन्ननिमित्तोपादानतां सूचयित्वा अध्यारोपदर्शनमुपसंहरति।

**धानादिव वटो यस्मात् प्रादुरासीदिदं जगत्।**
**स ब्रह्मा स शिवो विष्णुः स परः सर्व एव सः।।(१०)**

**अन्वयः-** धानात् वटः इव यस्मात् इदं जगत् प्रादुरासीत् सः ब्रह्म सः शिवः सः परः सः एव सर्वः।

धानात् वटः इव यस्मात् इदं जगत् प्रादुरासीत् सः ब्रह्मा, सः विष्णुः, सः शिवः, सः परः, सः एव सर्वः भवति।

अनेन, इन्द्रवरुणादीनाम् ईश्वरः ब्रह्मा, वैष्णवानाम् ईश्वरः विष्णुः, शैवानाम् ईश्वरः शिवः, वेदान्तिनां परमात्मा च परमार्थतः एक एव इति सिद्धान्तयति। त्रिमूर्त्तिव्यपदेशेन इदं जगत् त्रिमूर्त्तिस्वरूपादीश्वरादुत्पन्नं, तस्मिन्नेव स्थितिः, तस्मिन्नेव लयः इति, 'सर्व एव सः' इत्यादिना ईश्वरादन्यः प्रपञ्चः नास्तीति, 'स परः' इत्यादिना स ईश्वरः निर्विकारः निर्विशेषः परमात्मा भवतीति, प्रपञ्चः ईश्वरे अध्यस्तः भवति, अत एव प्रपञ्चस्य निमित्तकारणम्, उपादानकारणं च ईश्वर एव इति च सुव्यक्तं सिद्ध्यति।

वस्तुतः जगद्भावरहिते ब्रह्मणि जगद्बुद्धिरेव अध्यारोपः- "अतस्मिन् तद्बुद्धिः" अध्यारोप इत्युच्यते।

एवं दर्शनमालायाः प्रथमदर्शनम् अध्यारोपदर्शनं समाप्तम्।

## पुनरावृत्तिः(Recap)

- ससर्ज सर्वं सङ्कल्पमात्रेण परमेश्वरः।
- मायावीवाखिलं जगत्
- बीजादङ्कुरवत्।
- शक्तिस्तु द्विविधा ज्ञेया।
- मनोमात्रमिदं चित्रमिवाग्रे।
- योगीव सिद्धिजालं जगत्पतिः।
- नामरुपात्मनाऽत्यर्थं विभातीह पिशाचवत्।
- वेतालनगरं यथा।
- सुप्तेरिव प्रादुरासीत् युगपत्।
- स ब्रह्मा स शिवो विष्णु स परः सर्व एव सः।

## वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)

1. प्रथमदर्शनस्य नाम किम्?
2. अग्रे इदं भुवनं _______ आसीत्।
3. ससर्ज सर्वं संकल्पमात्रेण परमेश्वरः। किं ससर्ज?
4. वासनामयमेवादौ। कः वासनामयमासीत्?
5. कः मायावीवाखिलं जगत् असृजत्?
6. शक्तिः कतिविधा?
7. कः चित्रकारवत् वैचित्र्यं प्रापयामास?
8. आदौ इदं जगत् कथमासीत्?

9. कदा अविद्या भयंकरं भवति?
10. का पिशाचवत् इह विभाति?
11. इदं जगत् वेतालनगरमिव भवतीति कुतः उच्यते?
12. इदं विश्वं कथं प्रादुरासीत्?
13. स ब्रह्म स शिवो विष्णुः स परः सर्व एव सः। स कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत ।
**(Answer the following questions in one or two sentences)**

1. दर्शनमाला इति नाम कुतः?
2. अध्यारोपः कः?
3. बीजादङ्कुरवत् किं  स्वस्य शक्तिरेव स्वयम् असृजत्?
4. कयोरिव द्विविधा शक्तिः कदापि न वर्तते?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

1. ब्रह्मणि अध्यारोपितो भवतीति प्रतिपादयत।
2. दर्शनमालाम् अनुसृत्य अध्यारोपं विशदयत।

## निर्दिष्टाभ्यासाः(Assignments)

1. आदौ इदं जगत् कथमासीत्? ततः कथं केन प्रकारेण प्रादुरासीत्? कथमस्य वैचित्र्यमभवत् ? इदं जगत् कथमत्र वर्तते? विशदयत।
2. अद्वैतदर्शनम् अधिकृत्य अध्यारोपं लिखत।
3. इदं जगत् ईश्वरसंकल्पे कथमवर्तत इति विचारं कुरुत।

## वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. अध्यारोपदर्शम्
2. असत्

3. स्वप्रवत्
4. प्रभुः
5. प्रभुः (ईश्वरः)
6. द्वे
7. प्रकृतिरेव
8. आत्मविद्यासंकोचः
9. अविद्या
10. भयंकरं शून्यं च।
11. वासनामयम्
12. जगत्
13. ईश्वरः

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु
3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यू डेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यू डेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962


## अधिकवाचनग्रन्थौ (Suggested Readings)


1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।
2. दर्शनमाला ( जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः


SGOU

# Unit - 3
# अपवाददर्शनम्

## उद्देश्यानि (Learning Outcomes)

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः।
- दर्शनमालायां अध्यारोपापवादाभ्यां तत्वनिर्णयः भवति इति ज्ञानं अवगाहते।
- अपवादपदस्य अर्थज्ञानं अवगाहते।

## प्राग्व्यपेक्षाः(Pre requisites)

श्रीनारायणगुरुः अद्वैताचार्य इति निस्तर्कमेव। किन्तु गुरोः अद्वैतमतं अन्यमतैः विरुद्धं न भवति। रामानुजाचार्यस्य विशिष्टाद्वैतम्, मध्वाचार्यस्य द्वैतम्, बौद्धम् जैनम् इत्यादिदर्शनानां मेलनं गुरोः सिद्धान्तेषु द्रष्टुं शक्यते। विभिन्नदर्शनानां तथा विभिन्नधर्माणां च परमसत्यं किमिति तात्विकरूपेण दृष्ट्वा प्राणिजालस्य समस्तस्य उद्धारणाय प्रयोगाधिष्ठितं दर्शनं गुरुणा उपदिष्टम्। गुरुः स्वीयमात्मतत्त्वदर्शनं सम्प्रदायिकपथेन दर्शनमालायां विवृणोति। गुरुणा वेदान्तलोके दर्शितानि दश दर्शनानि। तेषु दश दर्शनेषु प्रथमं दर्शनं अध्यारोपदर्शनं सम्यगवगम्येदानीं द्वितीयम् अपवादर्शनम् अध्ययनं कुर्मः।

## मुख्यविषयाः(Key words)

अपवाददर्शनम्, तत्वनिर्णयः, आरोपितः, भ्रमम्, मन्दधीः, आनन्दघनः।

## Discussions

दृश्यते अनेन इति दर्शनम्। सत्यसंबंधितसुनिश्चितसुव्यक्तदृष्टिः इत्यर्थः। भारतीयदर्शनेषु अतिशोभनं दर्शनं भवति वेदान्तदर्शनम्। उत्तरमीमांसादर्शनमेव वेदान्तमिति नाम्ना प्रसिद्धम्। तस्य अवान्तरविभागः भवति अद्वैतवेदान्तः। अद्वैतवेदान्तसिद्धान्तानां व्यक्तरूपेण प्रतिपादनं दर्शनमालया गुरुणा क्रियते। अध्यारोपादिदशदर्शनेषु द्वितीयं दर्शनं भवति अपवाददर्शनम्। प्रथमे अध्यारोपदर्शने जगतः ब्रह्मण्यध्यस्तत्वं निरूपितं, तस्य च निरासः अपवाददर्शनेऽस्मिन् उपपत्तिभिः क्रियते। अध्यारोपापवादाभ्यां तत्वनिर्णयः भवति अद्वैतशास्त्रे। तामेव रीतिमनुसृत्य अत्रापि प्रथमम् अध्यारोपः निरूपितः। तदनन्तरं ब्रह्मण्यारोपितस्य जगतः अपवादः निरूप्यते।

### अपवाददर्शनम्

चैतन्यादागतं स्थूलसूक्ष्मात्मकमिदं जगत्।
अस्ति चेत्सद्घनं सर्वं नास्ति चेदस्ति चिद्घनम्।। (१)
अन्यन्न कारणात् कार्यमसदेतदतोऽखिलम्।
असतः कथमुत्पत्तिरनुत्पन्नस्य को लयः? (२)
यस्योत्पत्तिर्लयो नास्ति तत् परं ब्रह्म नेतरत्।
उत्पत्तिश्च लयोऽस्तीति भ्रमत्यात्मनि मायया।। (३)
कारणाव्यतिरिक्तत्वात्कार्यस्य कथमस्तिता?
भवत्यतः कारणस्य कथमस्ति च नास्तिता? (४)
कार्यत्वादसतोऽस्यास्ति कारणं न ह्यतो जगत्।
ब्रह्मैव तर्हि सदसदिति मुह्यति मन्दधीः।। (५)
एकस्यैवास्ति सत्ता चेदन्यस्यासौ क्व विद्यते।
सत्यस्त्यात्माश्रयो यद्यप्यसति स्यादसंभवः।। (६)
विभज्यावयवं सर्वमेकैकं तत्र दृश्यते।
चिन्मात्रमखिलं नान्यदिति मायाविदूरगम्।। (७)
चिदेव नान्यदाभाति चितः परमतो नहि।
यच्च नाभाति तदसद्यदसत्तन्न भाति च।। (८)
आनन्द एवास्ति भाति नान्यः कश्चिदतोऽखिलम्।
आनन्दघनमन्यन्न विनाऽनन्देन विद्यते।। (९)
सर्वं हि सच्चिदानन्दं नेह नानास्ति किञ्चन।
यः पश्यतीह नानेव मृत्योर्मृत्युं स गच्छति।। (१०)

चैतन्यादगतं स्थूलसूक्ष्मात्मकमिदं जगद् सर्वं सद्रूपमस्ति। नास्ति चेत् चिद्रूपमस्ति इति निरूपयति प्रथमे श्लोके-

**चैतन्यादागतं स्थूलसूक्ष्मात्मकमिदं जगत्।**
**अस्ति चेत्सद्घनं सर्वं नास्ति चेदस्ति चिद्घनम्।। (१)**

**अन्वयः-** चैतन्यात् आगतं स्थूलसूक्ष्मात्मकम् इदं जगत् अस्ति चेत् सर्वं सद्घनम् अस्ति, नास्ति चेत् चिद्घनम् अस्ति।

स्थूलसूक्ष्माकारेण परिदृश्यमानोऽयं प्रपञ्चः चैतन्यरूपादीश्वरात् आगतः। अथवा ईश्वर एव जगदिति प्रतिभाति। वस्तुतः जगत् असत् भवति। ईश्वरादभिन्नं जगदित्युक्ते सति तत्तु सन्मात्रमेवेति अवितर्कमेव। नास्तीति चेत् विद्यारूपेण भासितं चिन्मात्रमेव। सद्रूपं चिद्रूपं च तत् ईश्वरादभिन्नम्। अतः, जगत् अस्तीति चेत्, नास्तीति चेदपि तदीश्वरादभिन्नमिति सिद्ध्यति। अर्थात् जगद् सच्चिदानन्दस्वरूपे ब्रह्मणि आरोपितमेवेत्यतः असत्यम्, अधिष्ठाने ईश्वरे सत्यमिति च।

यस्मिन्नधिष्ठाने वस्तुनः त्रिकालेष्वपि अभावश्चेदपि भ्रान्त्या प्रतीतिर्भवति, तदा तस्मिन्नेवाधिष्ठाने तस्य वस्तुनः अभावनिश्चयः अपवाद इत्युच्यते। अत्र, अधिष्ठाने ब्रह्मणि भ्रान्त्या प्रतीतस्यास्य मायादिकप्रपञ्चस्य तस्मिन्नेवाधिष्ठानब्रह्मणि त्रिकालेष्वपि अभावनिश्चयः एव अपवादः।

ब्रह्म एकमेव सत्यं तद्भिन्नं प्रपञ्चादिकमसत्यमिति कार्यकारणरूपेण निरूपयति द्वितीये श्लोके-

**अन्यन्न कारणात् कार्यमसदेतदतोऽखिलम्।**
**असतः कथमुत्पत्तिरनुत्पन्नस्य को लयः? (२)**

**अन्वयः-** कारणात् अन्यत् कार्यं न। अतः एतद् अखिलम् असत्। असतः उत्पत्तिः कथम्? अनुत्पन्नस्य लयः कः?

कारणात् अन्यत् कार्यं नास्ति। अतः एतद् अखिलम् असत् भवति। असतः उद्भवः कथम्? अनुत्पन्नस्य लयः कः?

कारणाद्व्यतिरिक्तं नास्ति कार्यम्। अर्थात्, सूक्ष्माध्ययने कार्याणि सर्वम् असत् भवति, तानि च कारणान्येव भवतीति। अतः, दृश्यादृश्यः सर्वप्रपञ्चः कार्यमित्यतः असत् एव, न विद्यते इत्यर्थः। सत्, सर्वस्य एकैव कारणं ब्रह्म एव। असत् प्रपञ्चः कथं उद्भवति? कदापि नोत्पन्नमित्यर्थः। उत्पन्नस्य नाशः कुत्र? नाशोऽपि नास्ति। उत्पत्ति-नाशरहितस्य स्थितिरपि नास्ति। अर्थात्, ब्रह्मणि जगतः त्रिकालेष्वपि अभावत्वं स्पष्टमेवेति।

उत्पत्तिस्थितिलयरहितम् एकं वस्तु ब्रह्म एवेति निरूपयति अग्रिमश्लोके-

**यस्योत्पत्तिर्लयो नास्ति तत् परं ब्रह्म नेतरत्।**
**उत्पत्तिश्च लयोऽस्तीति भ्रमत्यात्मनि मायया।। (३)**

**अन्वयः-** यस्य उत्पत्तिः लयः च न अस्ति तत् परं ब्रह्म, इतरत् न। उत्पत्तिः लयः च आत्मनि अस्ति इति मायया भ्रमति।

यस्य उत्पत्तिः लयः च नास्ति, तत् सर्वोत्कृष्टं परं ब्रह्म, न इतरत्। उत्पत्तिः लयः च आत्मनि अस्तीति मायया भ्रमति।

उत्पत्तिः लयः च कथयतीत्यतः स्थितिरपि तस्मिन्नन्तर्गता भवति। उत्पत्तिस्थितिलयरहितं वस्तु सर्वोत्कृष्टसर्वातीतं च ब्रह्म एक एव भवति। आत्मरूपे ब्रह्मणि जगतः उत्पत्तिस्थितिलयाः वर्तन्त इति केवलं भ्रमः एव। स भ्रमः तु माया उपाधिनिमित्तं भवतीति। माया कथमिति अस्यामेव दर्शनमालायां चतुर्थदर्शने अध्यास्यति।

द्वितीये श्लोके निरूपितं कार्यकारणन्यायमनुगम्य, कार्यप्रपञ्चस्य नास्तिता, कारणब्रह्मणः अस्तिता च निरूपयति-

**कारणाव्यतिरिक्तत्वात्कार्यस्य कथमस्तिता?**
**भवत्यतः कारणस्य कथमस्ति च नास्तिता? (४)**

**अन्वयः-** कारणाव्यतिरिक्तत्वात् कार्यस्य कथम् अस्तिता भवति? अतः कारणस्य नास्तिता च कथम् अस्ति?

कारणात् अव्यतिरिक्तत्वात् कार्यस्य कथम् अस्तिता भवति? अतः एव कारणस्य नास्तिता च कथम् अस्ति?

कार्यं कारणात् अभिन्नमित्यतः कार्यस्य पृथक् सत्ता नास्ति। तेन एव हेतुना कारणस्य असत्ता अपि नास्ति। कथमित्युक्ते, कार्यस्य प्रपञ्चस्य प्रत्यक्षे सत्ता चेदपि अध्ययनेन तस्य असत्ता एवेति ज्ञायते। कार्यम् अस्ति चेत् तस्य कारणमपि भवति। तत् कार्यं तस्मात् कारणात् अभिन्नमपि भवेत्। एवं चेत् कारणं एव भवति, न कार्यम्। परिदृश्यमानस्य कार्यस्य नास्तित्वतः कारणस्य अबाधितास्तित्वं निश्चितं भवति। अमुमेव नियममनुसृत्य, कारणं ब्रह्म एक एव अस्ति। कार्यप्रपञ्चः नास्ति इति निर्वादं सिद्ध्यति।

ब्रह्म च नास्ति इति संशयश्चेत् तस्य निवृत्तिः अग्रिमश्लोके क्रियते। कार्यप्रपञ्चः दृश्यमानः इत्यतः, तथा कार्यं कारणादभिन्नमित्यतश्च, जगतः कारणं ब्रह्म एवेति निश्चीयते-

**कार्यत्वादसतोऽस्यास्ति कारणं न ह्यतो जगत्।**
**ब्रह्मैव तर्हि सदसदिति मुह्यति मन्दधीः।। (५)**

**अन्वयः-** कार्यत्वात् असतः अस्य कारणम् अस्ति। अतः जगत् नहि। तर्हि सत् ब्रह्म एव। मन्दधीः असत् इति मुह्यति।

कार्यत्वात् असतः प्रपञ्चस्य सत् कारणम् अस्ति। कारणमस्तीत्यतः कार्यप्रपञ्चः न हि,तर्हि सत् कारणं ब्रह्म एव भवति। मन्दधीः अथवा सदसद्वस्तुविवेकेन दृढताम् अप्राप्तबुद्धिः तत् सत् असदिति मुह्यति।

कार्याणि सर्वम् असदेव। अतः, कार्यं जगद् असत् भवति। असत् इत्यतः तस्य सत्कारणं निश्चयेन भवति। कारणस्य एव स्थितिः इत्यतः कार्यप्रपञ्चः केवलमसदिति स्वयं सिद्ध्यति। तत् सत् एकमेव कारणं ब्रह्म भवति। सदसद्विवेचने अशक्ताः मन्दबुद्धयः तत् सत् असदिति विचिन्त्या मुह्यति। अर्थात् ब्रह्म प्रपञ्चमिति विचार्य दुःखमनुभवन्ति।

कार्यस्य प्रपञ्चस्य सत्ता नास्तीति च पुनः वदति-

**एकस्यैवास्ति सत्ता चेदन्यस्यासौ क्व विद्यते।**
**सत्यस्त्यात्माश्रयो यद्यप्यसति स्यादसंभवः।। (६)**

**अन्वयः-** एकस्य एव सत्ता अस्ति। अन्यस्य असौ क्व विद्यते? सति (सत्ता) अस्ति चेत् आत्माश्रयः, असति (सत्ता अस्ति) यदि असंभवः अपि स्यात्।

एकस्य एव सत्ता अस्ति,कारणस्य ब्रह्मणः। अन्यस्य कार्यस्य प्रपञ्चस्य असौ सत्ता क्व विद्यते? नास्तीत्यर्थः। सति सत्ता अस्ति चेत् आत्माश्रयदोषः, असति यदि सत्ता अस्ति चेत् असंभवदोषोऽपि स्यात्।

पूर्वमेवोक्तकार्यकारणन्यायमनुसृत्य, एकस्यैव सत्ता भवति, अन्यस्य सत्ता नास्ति इति सिद्ध्यति। अर्थात् कारणस्य ब्रह्मणः एव सत्ता अस्ति, कार्यस्य प्रपञ्चस्य सत्ता नास्तीति च। एकस्यां सत्तायाम् अन्यस्य सत्ता अस्तीति चेत्, यथा सति ब्रह्मणि असतः प्रपञ्चस्य सत्ता अस्तीति चेत्, आत्माश्रयदोषः संभवति। स्वस्य उत्पत्तये स्वस्य अपेक्षा, स्वस्थितौ स्वापेक्षा इत्यादयः आत्माश्रयदोषः भवति। यदि, असति सत्ता अस्तीति चेत्, यथा

असति प्रपञ्चे तस्य सत्ता अस्तीति चेत्, तत्र असंभवदोषो भवति। गन्धर्वनगरं, वन्ध्यापुत्रः, शशविषाणः इत्यादयः असंभवाः भवन्ति, कदापि न संभवतीति। सद्रूपं वस्तु ब्रह्म एक एव इति, तथा ब्रह्मणि सति जगतः अन्यत् स्वसत्ता नास्ति इति, अत ब्रह्म एव जगदिति प्रतिभातीति, जगत् वस्तुतः त्रिकालेष्वपि असत् इति च सिद्ध्यति।

जगतः अवयवं प्रति विभज्य दृश्यते तर्हि तत्सर्वं चिन्मात्रं ब्रह्म एवेति दृश्यते इति अग्रिमे श्लोके कथयति-

**विभज्यावयवं सर्वमेकैकं तत्र दृश्यते।**
**चिन्मात्रमखिलं नान्यदिति मायाविदूरगम्।। (७)**

**अन्वयः-** अवयवम् एकैकं सर्वं विभज्य तत्र अखिलं मायाविदूरगं चिन्मात्रम्, अन्यत् न इति दृश्यते।

प्रपञ्चस्यावयवम् एकैकं सर्वं विभज्यते तर्हि तत्र अखिलं जगत् मायाविदूरगं, मायारहितं, केवलं ज्ञानस्वरूपं चिन्मात्रं, नान्यत् इति दृश्यते।

तत् कथमिति चेत्, पटस्य विभजने तन्तु, तूली, भूतकार्याणि परमाणवः, अज्ञानमिति सूक्ष्मान्तर्गतशोधनायां तेषां सर्वेषामपि एकमेव सत्ता अस्तीति, तथा पटादारभ्य परमाणपर्यन्ताः सर्वे अज्ञानस्य कार्याण्येवेति च सिद्ध्यति। तस्य अज्ञानस्य विभजने च तस्यापि नाशः भविष्यतीति व्यक्तमेव। प्रकाशागमने अन्धकारस्य नाशः इव ज्ञानागमने अज्ञानस्य नाशः। अज्ञानमपि वस्तुतः असदेव। तस्य स्वतः सत्ता नास्ति। प्रकाशेन अन्धकारस्याभावः यथा प्रत्यक्षीक्रियते, तथा ज्ञानेन अज्ञानस्याभावः च क्रियते।

तज्ज्ञानं पटादारभ्य अज्ञानपर्यन्तानां सर्वेषाम् एकमेव कारणं, सर्वेषां साक्षी, सर्वेषां प्रकाशनहेतुः, आधारः, एकसत्तास्वरूपः, अपरिणामेन नित्यं, स्वयं स्थितिः च भवति। सर्वव्यवहारेषु निर्विकारमिदं ज्ञान एव अज्ञानादारभ्य पटपर्यन्तस्य सर्वेषामपि कार्याणां कारणमपि इति च स्पष्टं भवति। कारणादभिन्नं कार्यस्यासंभवात् अज्ञानादि सर्वकार्याणि असत्वानि, कारणं ज्ञान एव सत्वं च भवति। ज्ञानस्य तु अन्यत् कारणं नास्ति, तत्तु निष्कारणमेव। तस्य परिणामोऽपि नास्ति, नित्यं भवति। अतः, सर्वेषामुपरि अन्ते अस्तिता ज्ञानस्य एव भवति। तज्ज्ञानस्वरूपमेव ब्रह्म, ईश्वरः इत्यादिभिरुच्यते।

चिन्मात्रं वस्तुता सत्ता इति आनन्दमिति च द्विधा भवतीति अग्रिमश्लोकद्वयेन प्रतिपादयति।

**चिदेव नान्यदाभाति चितः परमतो नहि।**
**यच्च नाभाति तदसद्यदसत्तन्न भाति च।। (८)**

**अन्वयः-** चित् एव आभाति। अन्यत् न, अतः चितःपर नहि। यत् च न आभाति तत् असत्। यत् असत् तत् न भाति च।

चित् एव, ज्ञानमेव सर्वत्र आभाति, नान्यत्। अतः चितः परं, ज्ञानादन्यत् किमपि न हि। यद् च न आभाति तत् असत् भवति। यत् असत् भवति तत् न भाति च।

बुद्ध्यां प्रकाशमानाः सर्ववस्तूनि चिन्मात्रमेवेति पूर्वश्लोके व्यक्तमेव। प्रकाशमानाः सर्वे सत् एव, नान्यत् हि। सत् नास्ति चेत् न भाति च। ज्ञानं एव सत् भवति।। सत् इति ज्ञानमिति च ब्रह्म (चैतन्यस्वरूप ईश्वरः) एव



SGOU

भाति। अतः प्रपञ्चरूपेण भासमानास्सर्वं ब्रह्म एव अन्यत् न हि। सद्रूपता चिद्रूपता च ब्रह्मणः स्वरूपमेव। सद्रूपता, चिद्रूपता, आनन्दरूपता च ब्रह्मणः स्वरूपलक्षणं भवति। सदिति चिदिति यद् भाति तत् आनन्द अपि भवति।

सत्, चित् सर्वं आनन्द एव भवति, नान्यः इति निरूपयति-

**आनन्द एवास्ति भाति नान्यः कश्चिदतोऽखिलम्।**
**आनन्दघनमन्यन्न विनाऽनन्देन विद्यते।। (९)**

**अन्वयः-** आनन्द एव अस्ति। आनन्द एव भाति। अन्यः कश्चित् न। अतः अखिलम् आनन्दघनम्। आनन्देन विना अन्यत् न विद्यते।

आनन्द एवास्ति, आनन्द एव भाति च। नान्यः कश्चित् न, कश्चित् न प्रकाशति। अतः अखिलप्रपञ्चः आनन्दघनं, आनन्दस्वरूपः भवति। आनन्देन विना अन्यत् न विद्यते।

'अस्ति भाति प्रियं रूपेण' प्रपञ्चे प्रतीयमानाः सर्वे एक एव वस्तुनः प्रतिपादकाः भवन्ति। तदेव वस्तुः सच्चिदानन्दस्वरूपः ईश्वरः (ब्रह्म) भवति। अन्ये नामरूपादयः असत् भवति। सच्चिदानन्दस्वरूपं परब्रह्म एव अस्ति नान्यदस्तीति सिद्ध्यति। 'अस्ति' इति पदम् आनन्दरूपस्यात्मनः सत्स्वरूपतां, 'भाति' इति चिद्स्वरूपतां च लक्ष्यति। तैत्तिरीयश्रुतेः ब्रह्ममानन्दवल्ल्यां आत्मनः आनन्दरूपतां वर्णयति यथा- 'स एको मानुष आनन्दः ते ये शतं मानुषा आनन्दाः, स एको मनुष्यगन्धर्वाणामानन्दः, ते ये शतं मनुष्यगन्धर्वाणामानन्दः' इत्यादिः विविधप्रकारेण दृश्यमानानन्दः सर्वाः एवमेवेति समर्थयित्वा अन्ते 'स एको ब्रह्मण आनन्दः, स यश्चायं पुरुषे, स एकः' इति आत्मनि आनन्दस्य एकत्वं सुदृढीकरोति।

अतः सर्वं सच्चिदानन्दं नान्यत् इति, एवं प्रकारस्य अस्य यथार्थज्ञानरहितस्य दुःखनिवृत्तिर्न भवति इति च सूचयति अपवाददर्शनस्यान्तिमे श्लोके-

**सर्वं हि सच्चिदानन्दं नेह नानास्ति किञ्चन।**
**यः पश्यतीह नानेव मृत्योर्मृत्युं स गच्छति।। (१०)**

**अन्वयः-** सर्वं सच्चिदानन्दं हि। इह किञ्चन नाना न अस्ति। इह यः नाना इव पश्यति सः मृत्योः मृत्युं गच्छति।

सर्वं सच्चिदानन्दं हि। इह अस्मिन् सच्चिदानन्दब्रह्मणि किञ्चन नाना नास्ति। यः इह ब्रह्मणि नाना इव पश्यति सः मृत्योः मृत्यं गच्छति।

'नेह नानास्ति किञ्चन मृत्योः स मृत्युं गच्छति यः इह नानेव पश्यति' इति कठोपनिषद् मन्त्राण्येव श्रुतिप्रमाणतार्थं अस्मिन् श्लोके उपयुक्तानि।

नाना इव दृश्यमानं सर्वं सच्चिदानन्दस्वरूपचैतन्यमेव हि। तस्मादेव चैतन्यात् अणुमात्रमपि नानात्वं नास्ति। वास्तविकसत्यात् विपरीतं, एव वस्तुन्येव नानात्वदर्शनेन अज्ञानेन पुनः पुनः जननमरणादीन् अनुभवति। एकत्वे नानात्वबोधाज्ञानं निष्कास्य, सर्वं सच्चिदानन्दस्वरूपब्रह्म एव इति एकत्वबोधजनने एव सर्वदुःखनिवृत्तिः परमानन्दप्राप्तिकैवल्यञ्च सिद्ध्यतीति।

इत्थं, सर्वाधिष्ठानं, देशकालाद्यनवच्छिन्नं ब्रह्म एव सर्वत्र सर्वस्मिन् काले अस्तीति, तथा ब्रह्मणि भ्रान्त्या प्रतीतोऽयं मायादिकप्रपञ्चः तस्मिन् ब्रह्मणि त्रिकालेष्वपि नास्तीति च सिद्ध्यति। अतः, सर्वदुःखनिवृत्यर्थं परमानन्दप्राप्त्यर्थम् अनेन अपवादयुक्त्या ब्रह्मणि प्रपञ्चस्याभावः सम्यक् निश्चीय, ब्रह्मणः सच्चिदानन्दस्वरूपत्वं साक्षात्करणीयम्। एवं द्वितीयदर्शनम् अपवाददर्शनं समाप्तम्।

## पुनरावृत्तिः (Recap)

- चैतन्यादागतं स्थूलसूक्ष्मात्मकमिदं जगत्।
- अन्यन्न कारणात् कार्यम्।
- तत् परं ब्रह्म नेतरत्।
- कार्यस्य कारणाव्यतिरिक्तत्वात् कथमस्तिता?
- कार्यत्वादसतोऽस्यास्ति।
- आत्माश्रय-असंभवदोषोपजायते।
- चिन्मात्रमखिलं नान्यदिति मायाविदूरगम्।
- चिदेव नान्यदाभाति।
- आनन्दघनमन्यन्न आनन्देन विना विद्यते।
- नेह नानास्ति किञ्चन।
- मृत्योर्मृत्युं स गच्छति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. कस्मादगतमिदं स्थूलसूक्ष्मात्मकं जगत्?
2. अस्ति चेत्सद्धनं सर्वं नास्ति चेदस्ति ________।
3. अतो अखिलं किं भवति?
4. कस्य उत्पत्तिर्लयो नास्ति?
5. आत्मनि उत्पत्तिर्लयश्चास्तीति कया भ्रमति?
6. सर्वम् कार्याणि----- एव।
7. अवयवान् विभज्यते चेत् किं दृश्यते?
8. _____एव आभाति, नान्यत्।
9. ______विना अन्यत् न विद्यते।

SGOU

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत ।

**(Answer the following questions in one or two sentences)**

1. असतः कथमुत्पत्तिः? कः लयः?
2. कः मृत्योर्मृत्युं गच्छति?
3. असत् किम्?
4. आत्माश्रय-असंभवदोषौ कथमुपजायेते?
5. कारणात् अव्यतिरिक्तत्वात् कार्यस्य कथम् अस्तिता भवति?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. अद्वैतशास्त्रानुसारम् अध्यारोपापवादाभ्यां तत्वनिर्णयः भवति । विशदयत?
2. जगतः उत्पततिः अपवाददर्शनाभ्यां निर्णयति। निरूपयत?
3. कार्यकारणन्यायमनुगम्य, कार्यप्रपञ्चस्य नास्तिता, कारणब्रह्मणः अस्तिता च निरूपयति?

## निर्दिष्टाभ्यासाः(Assignments)

1. आत्माश्रय-असंभवदोषोपजायेते विशदयत।
2. चैतन्यादगतं स्थूलसूक्ष्मात्मकमिदं जगत् निरूपयत।
3. असतः उत्पत्तिः कथम्? अनुत्पन्नस्य लयः कः? प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. चैतन्यात्
2. चिद्घनम्
3. असत्
4. ब्रह्मम्
5. मायया
6. असत्
7. चिन्मात्रमखिलं

SGOU

8. चित्
9. आनन्देन

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु
3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यू डेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यू डेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962


## अधिकवाचनग्रन्थौ (Suggested readings)


1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।
2. दर्शनमाला ( जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः


SGOU

# Unit - 4
# असत्यदर्शनम्

## उद्देश्यानि (Learning Outcomes)

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः।
- प्रपञ्चस्य असत्यत्वज्ञानं मुख्यकारणं भवतीति ज्ञानम् अवबोधयति।
- अद्वैतमतानुसारं असत्यत्वज्ञानस्य कारणं अवबोधयति।
- असत्यमधिकृत्य गुरोः वीक्षणरीतिः ज्ञायते।

## प्राग्व्यपेक्षाः (Pre requisites)

दर्शनमालायां इदं दर्शनं तृतीयं भवति। न सत्यम् असत्यम् इति विग्रहः । सत्यं न भवतीत्यर्थः । रज्जावारोपित सर्पः सत्यो न भवति । ब्रह्मण्यध्यस्तं जगत् सत्यं न भवति । यत् पारमार्थिकं सत्यं तत् कालत्रयातीतं भवति । कदाचित् सत् पूर्वं वा परं वा असत् तदसत्ये भवति। सत् (ब्रह्म) यत् प्रापयति तत्सत्यं भवति ।"सत्यं ज्ञानमनन्तं बह्म", "आनन्दं ब्रह्मेति व्यजानात् इत्यादि श्रुतयः सत्यं वेदयन्ति । असत्यमधिकृत्य गुरोः नारायणस्य वीक्षणरीतिः प्रकरणेऽस्मिन् साक्षात्कर्तुं शक्यते ।

## मुख्यविचारः (Key words)

असत्यम्, मनोमयम्, पारमार्थिकं, ब्रह्मण्यध्यस्तं, दृश्यं, मनोमयम्, भ्रमात् ।

## Discussions

**असत्यदर्शनम्**

**मनोमयमिदं सर्वं न मनः क्वापि विद्यते।**
**अतो व्योम्नीव नीलादि दृश्यते जगदात्मनि।। (१)**
**मनसोऽनन्यया सर्वं कल्प्यतेऽविद्यया जगत्।**
**विद्ययाऽसौ लयं याति तदाऽऽलेख्यमिवाखिलम्।।(२)**
**विजृंभते यत्तमसो भीरोरिह पिशाचवत्।**
**तदिदं जाग्रति स्वप्नलोकवत् दृश्यते बुधैः।।(३)**
**संकल्पकल्पितं दृश्यं संकल्पो यत्र विद्यते।**
**दृश्यं तत्र नान्यत्र कुत्रचिद्रज्जुसर्पवत्।।(४)**
**संकल्पमनसोः कश्चिन्नहि भेदोऽस्ति यन्मनः।**
**तदविद्यातमःप्रख्यमिन्द्रजालमिवाद्भुतम्।।(५)**

SGOU

मरीचिकावत् प्राज्ञस्य जगदात्मनि भासते।
बालस्य सत्यमिति च प्रतिबिम्बमिव भ्रमात्।।(६)
आत्मा न क्षीरवद्याति रूपान्तरमतोऽखिलम्।
विवर्त्तमिन्द्रजालेन विद्यते निर्मितं यथा।।(७)
मायैव जगतामादिकारणं निर्मितं तया।
सर्वं हि मायिनो नान्यदसत्यं सिद्धिजालवत्।।(८)
विभाति विश्वं वृद्धस्य वियद्वनमिवात्मनि।
असत्यं पुत्रिकारूपं बालस्येव विपर्ययः।।(९)
एकं सत्यं न द्वितीयं ह्यसत्यं भाति सत्यवत्।
शिलैव शिवलिङ्गं न द्वितीयं शिल्पिना कृतम्।।(१०)

सच्चिदानन्दस्वरूपतां साक्षात्कर्तुं प्रपञ्चस्य असत्यत्वज्ञानं मुख्यकारणं भवतीत्यतः तमेव विषयं प्रतिपादयति 'असत्यदर्शनम्'।

अयं प्रपञ्चः संकल्परूपः। संकल्पः तु मनसः भवति। मनस्तु असत्यमेव। अतः प्रपञ्चः अपि असत्यं भवति। एकैव सत्यं वस्तु ब्रह्म भवति। तस्मिन्नेव सत्यवस्तुनि अस्य असतः प्रपञ्चस्य प्रतीतिः। इत्यादिविषया एव अस्मिन् दर्शने प्रदर्शयन्ति।

**मनोमयमिदं सर्वं न मनः क्वापि विद्यते।**
**अतो व्योम्नीव नीलादि दृश्यते जगदात्मनि।। (१)**

**अन्वयः-** मनोमयम् इदं सर्वं मनः क्वापि न विद्यते। अतः व्योम्नि नीलादि इव आत्मनि जगत् दृश्यते।

इदं जगत् सर्वं केवलं मनोमयं भवति। मनः क्वापि न विद्यते। अतः व्योम्नि नीलादि इव आत्मनि जगत् दृश्यते।

व्योम्नि नीलादि वर्णाः वस्तुतः न सन्ति। तथापि, अस्य यथार्थबोधं भवत्यपि, व्योम्नि नीलादिवर्णाः प्रत्यक्षे दृश्यते। वस्तुतः आकाशः एव सत्यं, नीलादिः केवलं असत्यं च भवति। तथैव, निर्गुणे आत्मनि संकल्परूपः प्रपञ्चः दृश्यते। आत्मैव सत्यं, प्रपञ्चः मनोमयः इत्यतः असत्यं च भवति।

असत्यप्रपञ्चं सत्यमिति भ्रान्त्या भ्रमति। अविद्या एव तस्य भ्रमस्य कारणम्। तस्याः अविद्यायाः निवृत्तिः विद्यया आत्मज्ञानेन संभवतीति निरूपयति-

**मनसोऽनन्यया सर्वं कल्प्यतेऽविद्यया जगत्।**
**विद्ययाऽसौ लयं याति तदाऽऽलेख्यमिवाखिलम्।।(२)**

**अन्वयः-** मनसः अनन्यया अविद्यया सर्वं जगत् कल्प्यते। असौ विद्यया लयं याति। अखिलं आलेख्यम् इव।

मनसः अनन्यया अविद्यया सर्वं जगत् कल्प्यते। असौ विद्यया, आत्मज्ञानेन लयं याति। तदा अविद्या नाशे आत्मज्ञानोत्पत्तौ अखिलं जगत् आलेख्यमिव भवति।

मनः एव अविद्या वा अज्ञानम्। तेन अज्ञानेनैव प्रपञ्चः सत् इति भ्रमः भवति। अविद्यारूपमज्ञानं दूरीकर्तुं विद्यया एव शक्यते। अज्ञाननाशे आत्मज्ञानोत्पत्तिः, तदा च प्रपञ्चः केवलं मनःसंकल्पितं चित्रमिव दृश्यते।

SGOU

चित्रकारस्य संकल्पेन रचितं भवति चित्रम्। तथा च मनोरूपाविद्याशक्त्या कल्पितोऽयं सर्वप्रपञ्चः। अतः, असत्यमेव। प्रपञ्चः असत्यमिति वस्तुता आत्मज्ञानेन अनुभूयते।

तमोरूपाविद्या अस्याः जगत्संकल्पनायाः कारणमिति उदाहरणै सह निरूपयति-

**विजृंभते यत्तमसो भीरोरिह पिशाचवत्।**
**तदिदं जाग्रति स्वप्नलोकवत् दृश्यते बुधैः।।(३)**

**अन्वयः-** इह भीरोः तमसः पिशाचवत् यद् तमसः विजृम्भते तद् इदं बुधैः जाग्रति स्वप्नलोकवत् दृश्यते।

इह, अस्मिन् व्यवहारकाले, भीरोः तमसः पिशाचवत् यत् तमोमयाविद्यातः विजृंभते तद् इदं बुधैः जाग्रति स्वप्नलोकवत् दृश्यते।

भययुक्तस्य तु अन्धकारः पिशाचवत् भवति खलु। पिशाचः, तद्भीतिकारणं तमः च केवलम् असत्यं भवति। भीरोः भयात्, प्रकाशस्याभावात् च अन्धकार एव पिशाच इव भ्रमति। यथा प्रकाशमानीय पश्यति तथा अन्धकारः नास्ति, पिशाचः अपि नास्ति। तथैव अत्र अविद्यातत्त्वस्य अज्ञानेन तमोरूपाविद्यायाः रूपान्तरेण अयं प्रपञ्चः सत्यमिति भाति। भीरोः अन्धकारः यथा पिशाचवत् भवति तथा तमोरूपाविद्यातः उत्पन्नमानं जगद् आत्मज्ञानरहितानां कृते सत्यं भवति। किन्तु आत्मज्ञानयुक्तैः बुधैः अयं प्रपञ्चः जाग्रति स्वप्नलोकवत् असत्यम् इति दृश्यते।

अविद्याकार्यं जगत् केवलसंकल्पे एव भवति इति विशदीक्रियते-

**संकल्पकल्पितं दृश्यं संकल्पो यत्र विद्यते।**
**दृश्यं तत्र नान्यत्र कुत्रचिद्रज्जुसर्पवत्।।(४)**

**अन्वयः-** दृश्यं संकल्पकल्पितम्। यत्र सङ्कल्पः विद्यते तत्र च दृश्यं (विद्यते)। अन्यत्र कुत्रचित् न, रज्जुसर्पवत्।

इदं दृश्यं सङ्कल्पकल्पितं भवति। यत्र संकल्पः विद्यते तत्र च दृश्यप्रपञ्चः विद्यते। अन्यत्र कुत्रचित्, संकल्परहिते, न वर्तते, रज्जुसर्पवत्।

दृश्यं सर्वपदार्थाः संकल्पेन संभवन्ति। संकल्पमस्ति चेदेव वस्तुपदार्थाः भवन्ति। संकल्पः नास्ति चेत् पदार्थाः अपि सन्ति। रज्जौ सर्पः इति संकल्पेन संभवति। सर्पस्य संकल्पयुक्तस्य कृते मन्दप्रकाशे वर्त्तमाना रज्जुः सर्पमिति भ्रमः भवति। प्रकाशानयने सर्पः नास्ति रज्जुरेव भवति। पुनः कुतः सर्पागतः इति चेत् तस्य संकल्पादिति। तस्य सर्पस्य पारमार्थिकरीत्या व्यावहारिकरीत्या वा स्थितिः नास्ति, केवलं प्रातिभासिकमेव। प्रातिभासिकसर्पमिव सर्वे व्यावहारिकदृश्यपदार्थाः केवलसंकल्पमात्रा एव। तदेव अध्यारोपदर्शने उक्तं- 'ससर्ज सर्वं संकल्पमात्रेण परमेश्वरः' इति। संकल्पजन्यवस्तूनि सर्वाण्यपि असत्यानि। विवेकबोधे तेषां नाशः। किन्तु अत्र, रज्जुसर्पादयः जीवसंकल्पजन्याः इत्यतः जीवस्य विवेके नश्यन्ति। इदं व्यावहारिकं जगत्तु ईश्वरसंकल्पजन्यमित्यतः जीवविवेकेन, तत् असदिति ज्ञानेन, तस्य अशेषनाशः न शक्यते। ईश्वरसंकल्पः जीवसंकल्पात् बलिष्ठः इत्यतः ईश्वरसंकल्पे एव जगतः समष्टिप्रतीतिं दूरीकर्तुं शक्यते। तथापि दृढविवेकिनः

महात्मनां दृष्ट्यां जगत् त्रिकालेष्वपि असदेव इति ते अनुभवेन ज्ञायते। संकल्पात् जायते, संकल्पेणैव नश्यति इत्यतः जगदपि रज्जुसर्पवत् असत्यमेव।

संकल्पः मनः च एक एव, असत्यवस्तु सत्यमिव क्रियमाणा संकल्पशक्तिः अद्भुतावहा एवेति वर्णयति-

**संकल्पमनसोः कश्चिन्नहिभेदोऽस्ति यन्मनः।**
**तदविद्यातमःप्रख्यमिन्द्रजालमिवाद्भुतम्।।(५)**

**अन्वयः-** सङ्कल्पमनसोः कश्चित् भेदः नहि अस्ति। अविद्यातमः प्राख्यं यत्मनः तद् इन्द्रजालम् इव अद्भुतम्।

संकल्पमनसोः कश्चित् भेदः नास्ति हि। अविद्या-तमः प्रख्यं यत् मनः तद् इन्द्रजालम् इव अद्भुतं भवति। त्रिकालेऽपि असत्यः प्रपञ्चः नानाविधैर्वैचित्र्यैः सह सत्यमिति भ्रमयितुं शक्तिः संकल्पात्मकस्य मनसः अस्तीत्यतः तद् इन्द्रजालमिव अद्भुतं भवतीति। तद् तमोरूपमिव अविद्यारूपमिव च भवति अतः तस्य स्वरूपः क इति ज्ञातुमशक्यमेव अथवा तत् असत्यं भवति। ऐन्द्रजालिकस्य जालपदार्थाः असत्या इति सर्वे जानन्ति तथापि ते सत्यमिति पश्यन्ति। तस्य रहस्यस्याज्ञानेन सर्वे तदाश्चर्येण पश्यन्ति। तथा एव, मनसः स्वरूपः कोऽपि न जानातीत्यतः तम् अद्भुतं मन्यन्ते।

अविवेकिनः एव जगद् सत्यं भवति, विवेकिनः तु जगद् असत्यमिति बोधो भवति इति निरूपयति-

**मरीचिकावत् प्राज्ञस्य जगदात्मनि भासते।**
**बालस्य सत्यमिति च प्रतिबिम्बमिव भ्रमात्।।(६)**

**अन्वयः-** प्राज्ञस्य जगत् मरीचिकावत् आत्मनि भासते। बालस्य भ्रमात् प्रतिबिम्बम् इव सत्यम् इति च भासते।

प्राज्ञस्य सत्यासत्यविवेकिनः, इदं जगद् मरीचिकावत् आत्मनि भासते। विवेकयुक्तस्य बालस्य भ्रमात् प्रतिबिबंम् इव सत्यम् इति च भासते।

विवेकशुन्यः बालः दर्पणे स्वप्रतिच्छायां दृष्ट्वा स्वसमानः अन्यबालः दर्पणे अस्तीति चिन्तयति, दर्पणे दृष्टः बालः अपि सत्यमिति च विचार्यते, तत्तु भ्रमनिमित्तमेव तस्मिन् भासते। भ्रमः तु एकस्मिन् वस्तुनि अन्यवस्तुनः मिथ्याज्ञानं भवति। किन्तु, यावत् वस्तु यथार्थस्वरूपेण न गृह्यते तावत् तत् सत्यमिति भासते यदा विवेकः भवति तदा असत्यमिति च ज्ञायते। तथैव अविवेकिनः प्रपञ्चं सत्यमिति, विवेकिनः असत्यमिति च विज्ञायन्ते। मरुभूमौ जलप्रवाहरूपेण भ्रान्त्या मरीचिकां दृष्ट्वा मृगाः एव तत्सत्यमिति चिन्तयन्ति। विद्यायुक्तस्य अनुभवस्थानां च कृते तत् असत्यमेव भाति। तथा नित्यानित्यविवेकम् इत्यादि साधनैः दृढज्ञानयुक्तः प्राज्ञः इदं जगत् मरीचिकासदृशम् असत्यमिति पश्यति। अर्थात् आत्मनि प्रपञ्चः केवलाध्यस्तः एव इति अत एव अत्यन्तमसत्यमिति सारः।

निर्विकारे आत्मनि प्रपञ्चः केवलविवर्त्तरुपेण भासते, न तु आत्मा स्वयमेव दध्यादि परिणामवत् जगत् भवति इति विशदीकरोति-

**आत्मा न क्षीरवद्याति रूपान्तरमतोऽखिलम्।**
**विवर्त्तमिन्द्रजालेन विद्यते निर्मितं यथा।।(७)**

अन्वयः- आत्मा क्षीरवत् रूपान्तरं न याति। अतः अखिलं यथा इन्द्रजालेन निर्मितं विवर्त्तं विद्यते।

आत्मा क्षीरवत् रूपान्तरं (परिणामः) न याति। अतः, अखिलं (सर्वप्रपञ्चः) यथा इन्द्रज्ञालेन निर्मितं विवर्त्तं विद्यते।

जायते, अस्ति, वर्धते, परिणमते, अपक्षीयते, नश्यति इत्यादि परिणामरहितः **निर्विकारः** आत्मा क्षीरं यथा परिणामेन दधि, तक्रमित्यादिः भवति तथा आत्मा न विकारं प्राप्य प्रपञ्चाकारेण भवति। किन्तु, परमार्थे तु आत्मभिन्नं किमपि नास्ति, अणोरणीयान् परमाणुरपि अविकारम् अनुत्पन्नमित्यतः, दृश्यमानमिदं आश्चर्यवत् जगत् कुतः आयातं, कस्मिन्नाधारे वर्तते इत्यादि शङ्का अस्ति चेत तत्र **समाधानमुच्यते-** आत्मनि इन्द्रजालमिव विवर्त्तरूपेण विद्यते इति। यथा ऐन्द्रजालिकेन उपयक्ताः पदार्थाः वस्तुतः असत्यमेव तथा प्रपञ्चः अपि असत्यं भवति।

असत्यस्य जगतः कारणं केवलम् अज्ञानम् एव इति निरूपयति-

**मायैव जगतामादिकारणं निर्मितं तया।**
**सर्वं हि मायिनो नान्यदसत्यं सिद्धिजालवत्।।(८)**

**अन्वयः-** माया एव जगताम् आदिकारणम्। मायिनः नान्यत्, सिद्धिजालवत् असत्यं सर्वं तया हि निर्मितम्।

माया एव जगतां (**नानाविधैर्दृश्यमानप्रपञ्चस्य**) आदिकारणम् (उपादानकारणम्) मायिनः नान्यत्, तथापि सिध्दिजालवत् असत्यं सर्वं जगत् तया हि मायया निर्मितं भवति।

माया तु असत् भवति, असदेव माया प्रपञ्चस्य आदिकारणमित्युक्ते सति अयं **प्रपञ्चोऽपि** असत्यमेव भवति ननु। किन्तु सा माया **आत्मादभिन्ना** इत्यतः तस्याः कार्यप्रपञ्चः अपि मायिनः आत्मनः **अभिन्नः** भवति। यथा सिध्दिजालः सिध्दात् नान्यः, तथापि असत्यं तथा जगत् ईश्वरादभिन्नः चेदपि असत्यमेव भवति।

विवेकिनः कृते असदिति **अविवेकिनः** सत् इति च जगत् पश्यतीति पुनरप्युच्यते-

**विभाति विश्वं वृध्दस्य वियद्वनमिवात्मनि।**
**असत्यं पुत्रिकारूपं बालस्येव विपर्ययम्।।(९)**

**अन्वयः-** विश्वं वृद्धस्य वियद्वनम् इव आत्मनि विभाति। असत्यं पुत्रिकारूपं बालस्य **विपर्ययम्** इव।

ज्ञानवृध्दस्य इदं विश्वं आत्मनि वियद्वनम् इव विभाति। तद्कथमित्युक्ते, असत्यं पुत्रिकारूपं बालस्य विपर्ययम् इव भाति।

ज्ञानिनः इदं विश्वं आकाशे कल्पितवनमिव आत्मनि आरोपितमिति परयन्ति। अर्थात्, सर्वमपि आत्माकारेण पश्यन्ति- प्रपञ्चं **असत्यमिति**, अयं आत्मनि कल्पितमित्यतः आत्मा एव **सत्यमिति** च ज्ञायन्ते। अज्ञानिनाम् एव जगत् **सत्यमिति** भाति। जडवस्तुं पुत्रिकारूपं चित्रप्रतिमां बालाः स्वचैतन्यमिव चैतन्ययुक्तमिति विचार्य तैः क्रीडन्ति, भाषणं कुर्वन्ति च। वृध्दाः ज्ञानिनः तं केवलं जडं मत्वा असत्यमिति ज्ञायन्ते।

सत्यं एकमेव आत्मा इति, अन्यत् सर्वम् असत्यम् इति च अन्तिमे श्लोकेऽस्मिन् प्रदर्श्य इदं प्रकरणं उपसंहरति-

SGOU

एकं सत्यं न द्वितीयं ह्यसत्यं भाति सत्यवत्।
शिलैव शिवलिङ्गं न द्वितीयं शिल्पिना कृतम्।।(१०)

**अन्वयः-** एकं सत्यं द्वितीयं न असत्यं हि सत्यवत् भाति। शिला एव शिवलिङ्गम्। शिल्पिना कृतं द्वितीयं न।

एकं सत्यम् अस्ति। द्वितीयं न सत्यं वर्तते, असत्यं हि सत्यवत् भाति। शिला एवा शिवलिङ्गम्, शिल्पिना कृतं द्वितियं न भवति।

आत्मा एक एव सत्यं भवति। आत्मभिन्नं किमपि सत्यं न वर्तते। असत्यं जगत् तु सत्यमिति तद्वत् भाति। शिवलिङ्गकारेण केवलं शिला एव भाति। शिवलिङ्गं तु शिलातः भिन्नं वस्तु इति सत्यं वस्तु इति भाति च। सत्यं तु शिला, तस्मिन् सत्यवस्तुनि शिवलिङ्गं भाति च। शिलातः भिन्नं न्यूतनं किमपि शिल्पिना न कृतं वर्तते। शिवलिङ्गं शिला एव, शिला सत्यं, शिवलिङ्गम् असत्यं च। तथा असत्यप्रपञ्चः सत्यमिति भाति इत्यर्थः।

इत्थम् असत्यं सत्यमिति विभाति इत्यस्य कारणं माया भवतीत्युक्त्वा तृतीयं दर्शनम् असत्यदर्शनम् समाप्तम्।

## पुनरावृत्तिः (Recap)

- व्योम्नीव नीलादि जगदात्मनि दृश्यते।
- अविद्यया जगत् कल्प्यते।
- विद्यया लयं याति। तदाऽऽलेख्यमिवाखिलम्।
- भीरोरिह पिशाचवत्।
- स्वप्नलोकवत् बुधैः दृश्यते।
- दृश्यं संकल्पकल्पितं, रज्जुसर्पवत्।
- इन्द्रजालमिवाद्भुतम्।
- आत्मनि जगत् मरीचिकावत् भासते।
- आत्मा न क्षीरवद्याति।
- विवर्त्तमिन्द्रजालेन विद्यते।
- जगतामादिकारणं माया एव।
- असत्यं सिद्धिजालवत्।
- असत्यं पुत्रिकारूपं बालस्येव विपर्ययम्।
- एकं सत्यं न द्वितीयं, शिलैव शिवलिङ्गम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. व्योम्नीव नीलादि आत्मनि किं दृश्यते?

SGOU

2. अविद्यया कल्पितं किम्?
3. इदं विश्वं बुधैः कथं दृश्यते?
4. रज्जुसर्पवत् यत्र संकल्पः तत्र कः विद्यते?
5. प्राज्ञस्य आत्मनि जगत् कीदृशं भासते?
6. कः न क्षीरवद्याति?
7. जगतामादिकारणं का?
8. वृद्धस्य विश्वं आत्मनि कथमिव विभाति?
9. एकं _____न द्वितीयम्।
10. तृतीयदर्शनस्य नाम किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. अविद्यातमः प्रख्यमिन्द्रजालमिवाद्भुतं किम्?
2. जगदः असत्यत्वं इन्द्रजाल दृष्टान्तेन प्रतिपादयत?
3. जगद् सत्यं भवति, असत्यमिति भवति। निरुपयत?
4. जगतः कारणं केवलम् अज्ञानम् इति । कुतः?
5. सत्यं एकमेव, अन्यत् सर्वम् असत्यम् इति केन प्रकारेण प्रतिपादयति?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. अविद्यया जगत् कल्प्यते। विशदयत।
2. असत्यस्य जगतः कारणं अज्ञानम् इति निरूपयत।
3. अविद्याकार्यं जगत् केवलसंकल्पे एव भवति। विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. प्रपञ्चस्य असत्यत्वज्ञानं मुख्यकारणं इति विषयं प्रतिपादयत।
2. असत्यदर्शनं दर्शनमालायां रीत्या विशदयत।

SGOU

3. दृश्यप्रपञ्चं संकल्पकल्पितं, रज्जुसर्पवत्। प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. जगत्
2. जगत्
3. जाग्रति स्वप्नलोकवत्
4. दृश्यप्रपञ्चः
5. मरीचिकावत्
6. आत्मा
7. माया
8. वियद्वनम्
9. सत्यम्
10. असत्यदर्शनम्

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु
3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यूडेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यू डेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962


## अधिकवाचनग्रन्थौ (Suggested readings)


1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।


SGOU

2. दर्शनमाला (जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः

SGOU

BLOCK -2

# मायादर्शनम्, भानदर्शनम्, कर्मदर्शनम्, ज्ञानदर्शनम् च।

SGOU

# Unit -1
# मायादर्शनम्

## उद्देश्यानि Learning Outcomes

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः।
- अद्वैतदर्शने मायायाः स्वरूपं अवगच्छति।
- जगतः मिथ्यात्वं ज्ञायते।

## प्राग्व्यपेक्षाः(Pre requisites)

दर्शनमालायां चतर्थदर्शनं भवति मायादर्शनम्। दर्शनेनाऽनेन मायायाः लक्षणं, विभागः, भेदानां स्वरूपं च निरूप्यते । जगतो मिथ्यात्वेनैव द्वैतनिरासः संभवति। ततश्च अद्वैतसिद्धिः । पारमार्थिकं सत्यत्वं ब्रह्मण एवं भवति। अद्वैतिनां मतमनुसृत्य मायां प्रतिपादयति नारायणगुरुः ।

## मुख्यविचारः(Key words)

माया, विद्या, अविद्या, रज्जुसर्प्पम्, शुक्तिका, प्रकृति, त्रिगुणम्, ज्ञानेद्रियाणि, कर्मेद्रियाणि, प्राणः।

## Discussions

**मायादर्शनम्**

न विद्यते या सा माया विद्याऽविद्या पराऽपरा।
तमः प्रधानं प्रकृतिर्बहुधा सैव भासते।।(१)
प्रागुत्पत्तेर्यथाऽभावो मृदेव ब्रह्मणः पृथक्।
न विद्यते ब्रह्म हि या सा मायाऽमेयवैभवा।।(२)
अनात्मा न सदात्मा सदिति विद्योतते यया।
सा विद्येयं यथा रज्जुसर्पतत्त्वावधारणम्।।(३)
आत्मा न सदनात्मा सदिति विद्योतते यया।
सैवाविद्या यथा रज्जुसर्पयोरयथार्थदृक्।।(४)
इन्द्रियाणि मनोबुद्धिः पञ्चप्राणादयो यया।
विसृज्यन्ते सैव परा सूक्ष्माङ्गानि चिदात्मनः।।(५)
अङ्गान्येतान्यवष्टभ्य सुखी दुःखीव मुह्यति।
चिदात्मा मायया स्वस्य तत्वतोऽस्ति न किञ्चन।।(६)
इन्द्रियाणां हि विषयः प्रपञ्चोऽयं विसृज्यते।

**यया सैवापराऽध्यात्मस्थूलसङ्कल्पनामयी।(७)**
**शुक्तिकायां यदाऽज्ञानं रजतस्य यथात्मनि।**
**कल्पितस्य निदानं तत्तम इत्यवगम्यते।।(८)**
**धीयतेऽस्मिन् प्रकर्षेण बीजे वृक्ष इवाखिलम्।**
**अतः प्राधान्यतो वाऽस्य प्रधानमिति कथ्यते।।(९)**
**करोतीति प्रकर्षेण प्रकृत्यैव गुणान् पृथक्।**
**निगद्यतेऽसौ प्रकृतिरितिह त्रिगुणात्मिका।।(१०)**

असत्यं सत्यमिति मायया भासते इत्यतः मायां विशदीकर्तुं 'मायादर्शनम्' नामकं दर्शनमालायाः चतुर्थं दर्शनम्।

**न विद्यते या सा माया विद्याऽविद्या पराऽपरा।**
**तमः प्रधानं प्रकृतिर्बहुधा सैव भासते।।(१)**

**अन्वयः-** या न विद्यते सा माया। सा एव अविद्या परा अपरा तमः प्रधानं प्रकृतिः बहुधा भासते।

या न विद्यते सा माया। सा एव विद्या, अविद्या, परा, अपरा, तमः, प्रधानं, प्रकृतिः इति बहुधा भासते। 'माया' इति पदस्य मिथ्या इत्यर्थः, पारमार्थिके असत्वं व्यावहारिके तु सत्वं च भवति माया, सा एव माया विद्यादि विविधाकारेण भासते।

अत्रारभ्य अग्रिमेषु नवश्लोकेष्वपि मायां, तस्याः भेदाः विद्यादयः च वर्णयति। अग्रिमे श्लोके माया एव विवर्णयति-

**प्रागुत्पत्तेर्यथाऽभावो मृदेव ब्रह्मणः पृथक्।**
**न विद्यते ब्रह्म हि या सा मायाऽमेयवैभवा।।(२)**

**अन्वयः-** यथा उत्पत्तेः प्राक् अभावः मृत् एव, उत्पत्तेः प्राक् या ब्रह्मणः पृथक् न विद्यते, या ब्रह्म हि,सा अमेयवैभवा माया।

यथा घटस्य उत्पत्तेः प्राक् तस्य अभावः मृत् एव तथा जगतः उत्पत्तेः प्राक् या ब्रह्मणः पृथक् न विद्यते या ब्रह्म हि सा अमेयवैभवा माया भवति।

अभावः तु नास्तित्वमित्येव लौकिकव्यवहारार्थः चेदपि नैयायिकमते तु अभावः भावादनन्यः (सत्वादनन्यः) भवति। घटस्य उत्पत्तेः प्राक् तस्य अभावः मृदि भवति अथवा मृदेव घटाभावरूपेण वर्तते। अतः एव घटस्य उत्पत्तेः अभावः (घटाप्रागभावः) मृत् एव भवतीत्युच्यते। अर्थात् घटस्य अभावः मृदभावः च एक एव। किन्तु वस्तुतः घटस्य उत्पत्यनन्तरं घटाभावः कल्प्यते, तथा मृदभावः एव भवति च। एकस्याभावे सर्वदा अन्यस्य भावः भवति, यथा घटस्य प्रागभावे मृद् इव, अन्य वस्तु एव भवति। तथैव, जगतः उत्पत्तेः प्राक् तस्य अभावः ब्रह्मादनन्ये कुत्रचित् वर्तते, तत्तु ब्रह्म एव भवति। किन्तु अविकारितः ब्रह्मणः विकारयुक्तं जगत् कथमुत्पद्यते इति अनुमानादिभिरपि अप्राप्यविषयः भवति। अतः, जगतः उत्पत्तेः कारणं, तथा ब्रह्मादनन्यं तम् अभावम् "अमेयवैभवा माया" इत्युच्यते। अथवा, सा माया- जगतः अभावः- ब्रह्म एव। या न विद्यते सा एव माया इति

पूर्वमेवोक्तम्। किन्तु वस्तुतः यत् विद्यते तद् ब्रह्म भवति। अविद्यमानायाः मायायाः शक्तिः अनन्ता दुरूहा च भवतीत्यतः ताम् 'अमेयवैभवा' इति उच्यते। मनः, संकल्पः इत्यादयाः सर्वमपि माया हि।

**अनात्मा न सदात्मा सदिति विद्योतते यया।**
**सा विद्येयं यथा रज्जुसर्पतत्त्वावधारणम्।।(३)**

**अन्वयः-** आत्मा सत् अनात्मा न सत् इति यया विद्योतते सा इयं विद्या। यथा **रज्जुसर्वतत्त्वावधारणम्।**

आत्मा सत्, अनात्मा न सत् इति यया विद्योतते सा इयं विद्या, यथा **रज्जुसर्पतत्वावधारणम्।**

वस्तुनः यथावत् वस्तु इति **ज्ञानमेव** यथार्थज्ञानम्। आत्मा एव अस्ति, आत्मभिन्नं **सर्वमसत्यमिति** यया विद्योतते सा एव यथार्थज्ञानं 'विद्या' भवति। मायायाः प्रकाशमयः तमोमयः च द्वौ भेदौ स्तः। तयोः प्रकाशमयः एव विद्येत्युच्यते। "**विद्ययाऽमृतमश्नुते**" इत्यादिश्रुतेः तामेव विद्याम् उपदिशति। विद्या एव साक्षान्मोक्षस्य कारणम्।

तमोमयाम् अविद्यां विशदीकरोति-

**आत्मा न सदनात्मा सदिति विद्योतते यया।**
**सैवाविद्या यथी रज्जुसर्पयोरयथार्थदृक्।।(४)**

**अन्वयः-** आत्मा न सत् अनात्मा सत् इति यया विद्योतते सा एव अविद्या। यथा रज्जुसर्पयोः अयथार्थदृक्।

आत्मा न सत्, अनात्मा सत् इति यया विद्योतते सा एव अविद्या, यथा रज्जुसर्पयोः **अयथार्थदृक्।**

ज्ञानरूपा विद्या अज्ञानरूपा च अविद्या। विद्यायाः विपरीतस्वभावयुक्ता भवति अविद्या।

"अनित्यशुचिदुःखात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति पतञ्जलेः वचनमस्ति।

अग्रिमश्लोके माया भेदेषु परा इति भेदं वर्णयति-

**इन्द्रियाणि मनोबुद्धिः पञ्चप्राणादयो यया।**
**विसृज्यन्ते सैव परा सूक्ष्माङ्गानि चिदात्मनः।।(५)**

**अन्वयः-** चिदात्मनः सूक्ष्माङ्गानि इन्द्रियाणि मनोबुद्धिः पञ्चप्राणादयः यया विसृज्यन्ते सा एव परा।

चिदात्मनः जीवस्य सूक्ष्माङ्गानि ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, मनः, बुद्धिः, पञ्च **प्राणाः** इत्यादयः यया विसृज्यन्ते सा एव 'परा' माया।

श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि, वाक्-पाणि-पाद-पायु-उपस्थाख्यानि पञ्चकर्मेन्द्रियाणि, प्राणापानव्यानोदानसमानाः पञ्च प्राणाः च भवन्ति। एतानि चिदात्मनः सूक्ष्माङ्गानि भवन्ति। जीवः ब्रह्म च चिदात्मा एव निरवयवब्रह्मणः तु सूक्ष्माङ्गत्वप्राप्तौ तस्य 'जीवः' इति संज्ञा जायते। तथा अङ्गरहितस्य ब्रह्मणः अङ्गान् विसृज्य जीवत्वव्यमोहादीन् यया उत्पाद्यन्ते सा मायाविशेषा एव परा भवति।

सा परा एव जीवस्य सुखदुःखादि व्यामोहानां कारणमिति निरूपयति-

**अङ्गान्येतान्यवष्टभ्य सुखी दुःखीव मुह्यति।**
**चिदात्मा मायया स्वस्य तत्वतोऽस्ति न किञ्चन।।(६)**

**अन्वयः-** चिदात्मा स्वस्य मायया एतानि अङ्गानि अवष्टभ्य सुखी इव दुःखी इव मुह्यति। तत्त्वतः किञ्चन न अस्ति।

चिदात्मा (जीवः) स्वस्य मायया एतानि अङ्गानि (पूर्वोक्तानि इन्द्रियाणि) अवष्टभ्य सुखी इव, दुःखी इव मुह्यति। तत्त्वतः किञ्चन नास्ति।

जीवः तु वैषयिकसुखदःखे तानि स्वस्य सुखदुःखानि एव इति, स्वयं तान् सुखदुःखान् अनुभवितव्यमिति च विचार्य सुखी इव दुःखी इव च मुह्यति। किन्तु वस्तुतया तानि सुखदुःखानि कल्पितानि इत्यतः असत्यानि। चिदात्मा जीवः सदापि सुखदुःखादिविनिर्मुक्तः भवति। सुखी इति दुःखी इति च व्यामोहः परा इति मायया एव संभवति।

सूक्ष्मरूपायाः परायाः स्थूलरूपाम् अपरां निरूपयति-

**इन्द्रियाणां हि विषयः प्रपञ्चोऽयं विसृज्यते।**
**यया सैवापराऽध्यात्मस्थूलसङ्कल्पनामयी।(७)**

**अन्वयः-** इन्द्रियाणां हि विषयः अयं प्रपञ्चः यया विसृज्यते सा एव अध्यात्मस्थूलसंकल्पनामयी अपरा।

इन्द्रियाणां हि विषयः अयं स्थूलप्रपञ्चः यया विसृज्यते सा एव अध्यात्मस्थूलसंकल्पनामयी अपरा भवति।

पञ्चभूतात्माकः दृश्यप्रपञ्चः संकल्पकल्पितः इति पूर्वमेवोक्तः। आत्मनि स्थूलसंकल्पनारूपेण स्थित्वा इन्द्रियगोचरं प्रपञ्चं विसृज्यते अपरा इति माया। परा सूक्ष्मा अपरा तु स्थूला च भवति।

अग्रिमश्लोके तमः इति मायाभेदं वर्णयति-

**शुक्तिकायां यदाऽज्ञानं रजतस्य यथात्मनि।**
**कल्पितस्य निदानं तत्तम इत्यवगम्यते।।(८)**

**अन्वयः-** यथा शुक्तिकायां कल्पितस्य रजतस्य अज्ञानं निदानं भवति तथा आत्मनि कल्पितस्य जगतः निदानं यत् अज्ञानं तत् तमः इति अवगम्यते।

यथा शुक्तिकायां कल्पितस्य रजतस्य रजतत्वबोधस्य अज्ञानं निदानं भवति तथा आत्मनि कल्पितस्य जगतः निदानं यत् अज्ञानं तत् तमः अवगम्यते।

आत्मानं ज्ञात्वैव आत्मा एव सत्यमिति विज्ञायते, प्रपञ्चः आत्मनि कल्पितः अत एव असत्यमिति च ज्ञायते। यथा शुक्तिकायां रजतस्य अध्यासे तमः कारणं तथा आत्मनि जगतः अध्यासे कारणं तमोरूपा माया भवति। वस्तुनः यथार्थरूपग्रहणे अन्धकारः प्रतिबन्धः भवतीत्यतः एव अस्याः मायायाः अन्धकारपर्यायवाची 'तमः' इति नाम भवति।

अथ प्रधानमिति मायां वर्णयति-

**धीयतेऽस्मिन् प्रकर्षेण बीजे वृक्ष इवाखिलम्।**
**अतः प्राधान्यतो वाऽस्य प्रधानमिति कथ्यते।।(९)**

**अन्वयः-** बीजे वृक्षः इव अखिलम् अस्मिन् प्रकर्षेण धीयते इति अतः वा अस्य प्राधान्यतः वा इदं प्रधानम् इति कथ्यते।

बीजे वृक्ष इव अखिलप्रपञ्चः अस्मिन् प्रकर्षेण (मुख्यतः) धीयते इति अतः वा, अस्य प्राधान्यतः वा इदं प्रधानम् इति कथ्यते।

अणुपरिणामे सूक्ष्मे वटवृक्षबीजे यथा अखिलं वटवृक्षं धार्यते तथा अयमखिलप्रपञ्चः मायायां धीयते।

तथा आप्रपञ्चम् आश्चर्येण स्वस्यां धारयितुम् एका शक्तिः मायायां भवतीत्यतः तथैव विद्यादिभेदेभ्यः अस्य अतिप्राधान्यमस्तीत्यतः च इदं प्रधानम् इति कथितुं युक्तमेव।

अन्तिमे श्लोके 'प्रकृति' इति मायायाः भेदं निरूप्य मायादर्शनम् उपसंहरति-

**करोतीति प्रकर्षेण प्रकृत्यैव गुणान् पृथक्।**
**निगद्यतेऽसौ प्रकृतिरितिह त्रिगुणात्मिका।।(१०)**

**अन्वयः-** प्रकृत्या एव गुणान् प्रकर्षेण पृथक् करोति इति असौ त्रिगुणात्मिका प्रकृतिः इति इह निगद्यते।

इयं माया प्रकृत्या एव सत्व-रजो-तम इति गुणान् प्रकर्षेण पृथक् करोति इति, असौ त्रिगुणात्मिका प्रकृतिः इति (श्रुतिस्मृतिपुराणादिषु) इह निगद्यते।

सत्वरजस्तमोगुणाः सृष्टेः पूर्वमेव मायायाम् एकीभूत्वा भवति, आदौ प्रकृतिः तान् आश्चर्येण पृथक् करोति, अत एव तस्याः प्रकृति इति नाम सिद्ध्यति। गुणभेदादेव सृष्ट्यां वैचित्र्यः संभवति। प्रपञ्चस्य तादृशवैचित्र्यस्य कारणभूता माया एव प्रकृतिः।

इत्थम् अस्मिन् दर्शने माया हि विद्या, अविद्या, परा, अपरा, तमः, प्रधानं, प्रकृतिः इति अष्टप्रकारेण निरूपिता। परमार्थे न विद्यते इत्यतः 'माया' इति, आत्मानात्मविवेकस्य कारणमित्यतः 'विद्या' इति, विपरीतज्ञानस्य (अविवेकस्य) हेतुः इत्यतः 'अविद्या' इति, सूक्ष्मरूपा तथा च जीवस्य सूक्ष्माङ्गानि इन्द्रियाणि विसृज्यते इत्यतः 'परा' इति, स्थूलरूपा तथा च इन्द्रियविषयं स्थूलप्रपञ्चं विसृज्यते इत्यतः 'अपरा' इति, अन्धकाररूपेण भूत्वा अध्यासस्य निदानं भवतीत्यतः 'तमः' इति, अखिलप्रपञ्चं प्रकर्षेण स्वस्यां धारयतीत्यतः 'प्रधान'मिति, प्रकृत्या एव त्रिगुणात्मिका भूत्वा सत्वरजस्तमोगुणान् प्रकर्षेण पृथक् कर्तुं हेतुः इत्यतः 'प्रकृति' इति च उच्यते। एतेषु भेदेषु सामान्येन मायायाः बहुविधवैचित्र्याणि अन्तर्भवन्ति इत्यतः तानेव निरूप्य दर्शनम् उपसंहरति।

एवं चतुर्थं दर्शनम् मायादर्शनं समाप्तम्।

## पुनरावृत्तिः (Recap)

1. न विद्यते या सा माया।
2. मायायाः अष्टभेदाः।
3. सा मायाऽमेयवैभवा।
4. रज्जुसर्पतत्त्वावधारणं यथा, आत्मा सदिति विद्योतते।

5. अनात्मा सदिति विद्योतते यया सैवाविद्या।
6. चिदात्मनः सूक्ष्माङ्गानि विसृज्यन्ते यया सैव परा।
7. सुखी दुःखीव मुह्यति।
8. प्रपञ्चोऽयं यया विसृज्यते सैवापरा।
9. कल्पितस्य निदानं तत् तम इत्यवगम्यते।
10. बीजे वृक्ष इवाखिलम्।
11. प्रकृतिरिति त्रिगुणात्मिका निगद्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. सा माया । का?
2. आत्मा____भवति। अनात्मा न सत्।
3. विद्या का?
4. अविद्या का?
5. परा का?
6. कानि अवष्टभ्य सुखी दुःखीव मुह्यति?
7. अपरा का?
8. तमः इति कम् अवगम्यते?
9. प्रकृत्यैव गुणान् केन पृथक् करोति?
10. चतुर्थदर्शनस्य नाम किम्?

SGOU

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. ज्ञानेद्रियाणि कति सन्ति? कानि च तानि?
2. कर्मेंद्रियाणि कति सन्ति? कानि च तानि?
3. मायायाः भेदाः के?
4. पञ्च प्राणाः के

5. तमोमयाम् अविद्यां लिखत।

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. मायायाः लक्षणं, विभागः, स्वरूपं च निरूप्यत।
2. कुतः प्रधानमिति कथ्यते?
3. सुखदुखादि व्यामोहः निरूपयत।

## निर्दिष्टाभ्यासः (Assignments)

1. अद्वैतिनां मतमनुसृत्य मायां प्रतिपादयत।
2. मायायाः भेदान् निरूपयत ।
3. असत्यं सत्यमिति मायया भासते । विशदीकुरुत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. न विद्यते
2. सत्
3. यथार्थज्ञानं(ज्ञानरूपा)
4. अज्ञानरूपा
5. सूक्ष्मरूपा
6. अङ्गानि
7. स्थूलप्रपञ्चः
8. अज्ञानं
9. प्रकर्षेण
10. मायादर्शनम्

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु


SGOU

3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यू डेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यू डेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962

## अधिकवाचनायग्रन्थौ (Suggested Readings)

1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।
2. दर्शनमाला ( जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः

SGOU

# Unit - 2
# भानदर्शनम्

## उद्देश्यानि (Learning Comes)

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः
- भानस्वरूपं जानाति।
- भानदर्शनस्य भेदान् अवगच्छति।

## प्राग्व्यपेक्षाः (Pre requisites)

अध्यारोप- अपवाद- असत्य-मायादर्शनानि अधीत्य इदानीं सर्वव्यवहाराणां हेतुं भानं विशदीकर्तुं भानदर्शनम्, आत्मनः कर्तृत्वप्रतिपादकं कर्मदर्शनम्, आत्मनः ज्ञानस्वरूपप्रदर्शनार्थं ज्ञानदर्शनञ्च अत्र प्रतिपाद्यते। भानदर्शनेन सिद्ध्यते यत्, इन्द्रियद्वारा अथवा अन्यप्रकारेण वा मनुष्यबुध्दिवृत्तौ भास्यमानाः पदार्थाः अयथार्थाः। सत् तु एक एव वस्तु बुध्दिवृत्तौ अभास्यमानं, भानाय अविषयकम्, अनध्यस्तं, तथापि भानादीनाम् आधारः, स्वयं निराधारः च आत्मा एव भवति। परमात्मा एव वस्तुतः वर्तते, स एकः नित्यः इति, कर्मरूपप्रपञ्चः अविद्यमानः परमात्मनि अध्यास्यरूपेण भास्यमानः भवति।

## मुख्यविचारः (Key words)

भानदर्शनम्, स्थूलम्, वायवः, सूक्ष्मम्, कारणम्, दृग्दृश्यमात्मानं, सामान्यं , विशेष।

## Discussion

**भानदर्शनम्**

**अन्तर्बहिर्वदासीनं सदा भ्रमरचञ्चलम्।**
**भानं द्विधैव सामान्यं विशेष इति भिद्यते।।(१)**
**स्थूलं सूक्ष्मं कारणं च तुर्यं चेति चतुर्विधम्।**
**भानाश्रयं हि तन्नाम भानस्याप्युपचर्यते।।(२)**
**दृश्यतामिह कायोऽहं घटोऽयमिति दृश्यते।**
**स्थूलमाश्रित्य यद्भानं स्थूलं तदिति मन्यते।।(३)**
**अत्र कायो घट इति भानं यत्तद्विशिष्यते।**
**तथाऽहमयमिति यत् सामान्यमिति च स्मृतम्।।(४)**
**इन्द्रियाणि मनोबुध्दी विषयाः पञ्च वायवः।**

**भास्यन्ते येन तत्सूक्ष्ममस्य सूक्ष्माश्रयत्वतः।।(५)**
**अज्ञोऽहमिति यद्भानं तत् कारणमुदाहृतम्।**
**अत्राहमिति सामान्यं विशेषोऽज्ञ इति स्फुरत्।।(६)**
**अहं ब्रह्मेति यद्भानं तत्तुर्यमिति शंस्यते।**
**सामान्यमहमित्यंशो ब्रह्मेत्यत्र विशिष्यते।।(७)**
**यत्र भानं तत्र भास्यं भानं यत्र न तत्र न।**
**भास्यमित्यन्वयेनापि व्यतिरेकेण बोध्यते।।(८)**
**यथा दृग्दृश्यमात्मानं स्वयमात्मा न पश्यति।**
**अतो न भास्यते ह्यात्मा यं पश्यति स भास्यते।।(९)**
**यद् भास्यते तदध्यस्तं अनध्यस्तं न भास्यते।**
**यदध्यस्तं तदसदप्यनध्यस्तं सदेव तत्।।(१०)**

अथ सर्वव्यवहाराणां हेतुं भानं विशदीकर्तुं भानदर्शनम् आरभ्यते-

**अन्तर्बहिर्वदासीनं सदा भ्रमरचञ्चलम्।**
**भानं द्विधैव सामान्यं विशेष इति भिद्यते।।(१)**

**अन्वयः-** बहिर्वत् अन्तः आसीनं सदा भ्रमरचञ्चलं भानं सामान्यं विशेषः इति द्विविधा एव भिद्यते।

बहिर्वत् अन्तः आसीनं सदा भ्रमरचञ्चलं (मधुमक्षिका इव) भानं सामान्यं विशेषः इति द्विविधा एव भिद्यते।

भानं तु सर्वव्यवहारहेतुः वृत्तिरूपः इति भासते। इदं भानं बहिर्वत् अन्तः अपि आस्ते। अथवा बहिः तथा अन्तः आस्तेति भासते। वस्तुतः तत् बहिः नास्ति अन्तः अपि नास्ति। अन्तः बहिः च स्थिति नस्तीत्यतः अतिचञ्चलम् इत्युच्यते, भ्रमरवत्। व्यवहारव्यवस्थामनसृत्य सामान्यं विशेषः इति द्वौ भेदौ कल्पेते।

भानस्य भानाश्रयस्य च स्थूलं, सूक्ष्मं, कारणं, तुर्यमिति चत्वारः भेदाः सन्ति। तेषु स्थूलं भानम् आश्रयं च ज्ञात्वा एव सामान्यं विशेषं च ज्ञातुं शक्यते, अतः अग्रिमश्लोकेषु स्थूलादि चतुरान् भेदान्, स्थूलभानस्वरूपं तदनन्तरं सामान्यविशेषौ च निरुपयति-

**स्थूलं सूक्ष्मं कारणं च तुर्यं चेति चतुर्विधम्।**
**भानाश्रयं हि तन्नाम भानस्याप्युपचर्यते।।(२)**

**अन्वयः-** स्थूलं सूक्ष्मं कारणं तुर्यं च इति चतुर्विधं भानाश्रयं भवति। तत् नाम हि भानस्य अपि अपचर्यते च।

स्थूलं सूक्ष्मं कारणं तुर्यं च इति  चतुर्विधं भानाश्रयं, तत् नाम हि भानस्य अपि उपचर्यते चेति।

भानस्य भानाश्रयस्य च पृथक् चतुर्विधविभागाः सन्ति इत्यर्थः। अथात्, स्थूलभानाश्रयं, सूक्ष्मभानाश्रयं, कारणभानाश्रयं, तुर्यभानाश्रयं इति भानाश्रयं चतुर्विधं, तथैव स्थूलभानं, सुक्ष्मभानं, कारणभानं, तुर्यभानं इति भानं चतुर्विधं भवतीति। सामान्यं विशेषः इति भेदं सर्वेषामपि वर्तते यथा सामान्यस्थूलभानं, विशेषस्थूलभानं, सामान्यस्थूलाश्रयं, विशेषस्थूलाश्रयं इति सूक्ष्म-कारण-तुर्याणामपि भान-भानाश्रयाणां भेदाः वर्तन्ते।

अग्रिमश्लोके स्थूलभानं निरूपयति-

**दृश्यतामिह कायोऽहं घटोऽयमिति दृश्यते।**
**स्थूलमाश्रित्य यद्भानं स्थूलं तदिति मन्यते।।(३)**

**अन्वयः-** इह दृश्यताम्। अहं कायः अयं घटः इति स्थूलम् आश्रित्य यद्भानं दृश्यते तद् स्थूलम् इति मन्यते।

इह (प्रत्यक्षे) दृश्यताम्, अहं कायः, अयं घटः इति स्थूलम् आश्रित्य यद्भानं दृश्यते तद्स्थूलम् इति मन्यते।

अहं कायः, अयं घटः इत्यादि व्यवहाराः दृश्यान् स्थूलविषयान् आश्रित्य वर्तत इत्यतः तत्प्रकारकव्यवहाराणां हेतुः भानं स्थूलभानमित्युच्यते। स्थूलविषयाणां भासः स्थूलभानम् इति। इदं स्थूलभानं सर्वे जाग्रदवस्थायां प्रत्यक्षमिव अनुभूयते।

अथ सामान्यविशेषभानौ निरूपयतः-

**अत्र कायो घट इति भानं यत्तद्विशिष्यते।**
**तथाऽहमयमिति यत् सामान्यमिति च स्मृतम्।।(४)**

**अन्वयः-** अत्र कायः घटः इति भानं यद् तद् विशिष्यते। तथा अहं अयम् इति भानं यत् तत् सामान्यम् इति च स्मृतम्।

अत्र कायः, घट इति भानं यद्, तद् विशिष्यते। तथा अहम्, अयम् इति यत् भानं, तत् सामान्यम् इति च स्मृतम्। कायः, घटः, पटः, मठ इत्यादयः पृथक् विशेषयुक्ताः इत्यतः, इतरेतरभेदविशिष्टाः इत्यतः तेषां भानं विशेषभानम् इति कथ्यते। कायः घटपटादिभेदैः विशिष्टः भवति। पटः कायघटादि इतरेतरभेदैः विशिष्टः भवति। अत तेषां भानं विशेषभानो भवति। अहम्, अयम्, इदम् इत्यादिः काय-घट-पटादीन् व्यक्तिभेदविशेषं विना सामान्येन निर्दिशन्ति इत्यतः तेषां भानं सामान्यभानमित्युच्यते। स्थूलसूक्ष्मादिचतुर्विधानामपि सामान्यविशेषभेदो वर्तते।

अथ सूक्ष्मभानं कथ्यते-

**इन्द्रियाणि मनोबुध्दी विषयाः पञ्च वायवः।**
**भास्यन्ते येन तत्सूक्ष्ममस्य सूक्ष्माश्रयत्वतः।।(५)**

**अन्वयः-** इन्द्रियाणि मनोबुद्धी विषयाः पञ्च वायवः येन भास्यन्ते अस्य सूक्ष्माश्रयत्वतः तत् सूक्ष्मम्।

श्रोत्रचक्षुषादीनि इन्द्रियाणि, मनोबुध्दीति अन्तःकरणं, श्रौत्रादीनां अन्तःकरणस्य च विषयाः, प्राणापानादि पञ्चवायवः येन भास्यन्ते, अस्य सूक्ष्माश्रयत्वतः, तत् सूक्ष्मम् इति मन्यते।

सूक्ष्मभानं सूक्ष्मभानाश्रयमाश्रित्या भवति। श्रोत्रस्य शब्दग्रहणे, चक्षुषः रूपग्रहणे, त्वचः स्पर्शग्रहणे, जिह्वायाः रसग्रहणे, घ्राणस्य घ्राणग्रहणे च पृथक् पृथक् सूक्ष्माः ग्रहणशक्तिः वर्तते। बहिस्तात् शब्दं श्रोत्रेन्द्रियैः तस्य सूक्ष्मग्रहणशक्त्याः साहायेन वयं श्रुणुमः। तथैव ग्रहणशक्त्या चक्षुरादीनि अन्यानि इन्द्रियाणि विषयान् गृह्यन्ते, मनः विचार्यते, बुद्धिः विवेचयति, प्राणादयः वायवः गतिभेदान् ज्ञायन्ते, तयैव ग्रहणशक्त्याः प्रभावेन एव एतान् इन्द्रियान् अस्माभिः अनुभूयन्ते। तथापि अस्य स्वरूपं कथमिति ज्ञातुमशक्यमेव यतः तावत् अतिसूक्षमाः वर्तते। तावत् सूक्ष्मम् आश्रित्या एव इन्द्रियमनोबुद्धीनां, शब्दादिविषयाणां प्राणादिवायवानां भानं

संभवति। अतः, तत् भानं, शूक्ष्मं भानाश्रयमाश्रित्य भवतीत्यतः, तत् सूक्ष्मभानं कथ्यते। स्वप्नावस्थायामेव सूक्ष्मभानस्य स्पष्टानुभावः भवति। स्वप्नावस्थायाम् इन्द्रियादीनां विषयसंबन्धो नास्ति तथापि श्रोत्रादीनि इन्द्रियाणि शब्दरूपादीन् सूक्ष्मं गृह्णन्ति इति स्वप्नावस्थानुभवस्थाः अनुभूयन्ते। अथवा सर्वे स्वप्ने सुक्ष्मभानम् अनुभवन्तीति।

अग्रिमे श्लोके, सूक्ष्मं सुषुप्तिप्रत्यक्षं कारणभानं निरूपयति-

**अज्ञोऽहमिति यद्भानं तत् कारणमुदाहृतम्।**
**अत्राहमिति सामान्यं विशेषोऽज्ञ इति स्फुरत्।।(६)**

**अन्वयः-** अहम् अज्ञः इति भानं यत् तत् कारणम् इति उदाहृतम्। अत्र अहम् इति स्फुरत् यत् तत् सामान्यम् अज्ञः इति स्फुरत् यत् तत् विशेषः च।

अहम् अज्ञः इति यत् भानं, तत् कारणम् इति उदाहृतम् भवति। अत्र अहम् इति यत् स्फुरत् तत् सामान्यम्, अज्ञः इति यत् स्फुरत् तत् विशेष च भवति।

पूर्वश्लोके सूक्ष्माणाम् इन्द्रियाणां, मनो बुद्ध्यन्तःकरणानाम्, इन्द्रिय-मनोबुद्धीनां विषयाणां, प्राणादि पञ्चवायवानां च भानमधिकृत्य-सूक्ष्मभानमधिकृत्य कथितम्। अस्मिन् श्लोके तेभ्यः अपि सूक्ष्मं कारणभानं कथ्यते। इन्द्रियमनोबुध्दीनतीतं ज्ञानप्रतिबन्धकं, 'अज्ञोऽहम्' इति प्रतीतिहेतुः अज्ञानं वर्तते। तदज्ञनं हि स्थूलसूक्ष्मभानानां भानाश्रयाणां च कारणं भवति। इदमज्ञाननिमित्तमेव 'अज्ञोऽहम्' इति भानं संभवति। अतः इदं भानं कारणभानमित्युच्यते। सुषुप्तिकाले अस्य भानस्यानुभवः सुव्यक्तः भवति। 'सुखमहमस्वप्सं न किञ्चिदवेदिषम्' इति सुषुप्त्यनुभवस्थानां वचनं लोके प्रञ्चिध्दमेव खलु।

अत्र 'अहम्' इति स्वाभाविकतया सर्वेषु व्यापकत्वात् सामान्यम्, अज्ञः इति अहंव्यक्तिवृत्तिः, परिछिन्नम् अनन्तम् इन्यतः विशेषः च भवति।

अग्रिमश्लोके, सर्वभानादपि सुक्ष्मं, जाग्रत्- स्वप्न- सुषुप्त्यवस्थातितं तुर्यावस्थायामनुभूयमानम् अन्तिमं च तुर्यभानं निरुपयति-

**अहं ब्रह्मेति यद्भानं तत्तुर्यमिति शंस्यते।**
**सामान्यमहमित्यंशो ब्रह्मेत्यत्र विशिष्यते।।(७)**

**अन्वयः-** अहं ब्रह्म इति भानं यत् तत् तुर्यम् इति शंस्यते। अत्र अहम् इति अंशः सामान्यं ब्रह्म इति विशिष्यते।

'अहं ब्रह्म' इति यत् भानं, तत् तुर्यं इति शंस्यते। अत्र 'अहम्' इति अंशः सामान्यं, 'ब्रह्म' इति अंशः विशिष्यते च।

ध्याननिष्ठानां योगिनां सविकल्पकसमाधौ, सुषुप्त्यवस्थाज्ञानस्याग्रे, तुर्यावस्थायां, ब्रह्माकारवृत्तिरूपानुभवः भवति तुर्यभानम्। ब्रह्मभानस्य विषयम् अभूत्वा निर्गुणः भवति,तथापि ब्रह्मणः स्वरूपम् अनुसन्धानं कृत्वा अभेदेन ब्रह्मध्यानं कृत्वा य़ोगिनः 'अहं ब्रह्म' इति भानं संभवति। स्वरुपध्यानबलात्,

इन्द्रियदीनां वासना तथा सुषुप्त्यवस्थायाः 'अज्ञोऽहम्' इति प्रतीतिहेतुरज्ञानं च यदा क्षीयते तदा एव 'अहं ब्रह्म' इति तुर्यभानं भवति। अहं ब्रह्मानुभवस्य माहात्म्यसूचकं 'शंस्यते' इति कथनम्।

किन्तु, अपरोक्षज्ञानप्राप्ताः, निर्विकल्पसमाधिसिध्दिनः ज्ञानिनां कृते तेषां परमानुभवे किमपि भानं न संभवति। तुर्यभानस्याग्रे, ततोऽपि सूक्ष्मतरं भानं य कोऽपि न भवति। अतः केवलात् पण्डितपर्यन्तानां मनुष्याणां, घटात् ब्रह्म पर्यन्तवस्तूनं च भव्यमानं भानं स्थूल-सूक्ष्म-कारण-तुर्यभानेष्वेव अन्तर्भवन्ति। स्थूलभानं तु सर्वसाधारणं यथा तुर्यभानं योगीप्रत्यक्षं च भवति। तुर्यभाने 'अहं' इति सामान्यं, 'ब्रह्म' इति अहंव्यक्तिवृत्तिः, परिछिन्नवृत्तिरूपेण योगिनां भासमानमित्यतः विशेषः च भवति।

भानमस्ति चेत भास्यमपि भवति, भानं नास्ति चेत भास्यमपि, इदं अन्वयव्यतिरेकेण वर्णयति-

**यत्र भानं तत्र भास्यं भानं यत्र न तत्र न।**
**भास्यमित्यन्वयेनापि व्यतिरेकेण बोध्यते।।(८)**

**अन्वयः-** यत्र भानं तत्रभास्यम्, यत्र भानं न तत्र भास्यं न इति अन्वयेन व्यतिरेकेण अपि बोद्ध्यते।

यत्र भानं वर्तते, तत्र भास्यं वर्तते। यत्र भानं न वर्तते तत्र भास्यं न वर्तते इति अन्वयेन व्यतिरेकेण अपि बोद्ध्यते।

भानस्य विषयं यत्पदार्थं तत् भास्यम्। 'यत्र भानं, तत्र भास्यम्' इति अन्वयम्। साध्यसाधनानां सहचर्यमेव अन्वयम्। अत्र, साध्यं भास्यं, साधनं भानं च भवति। अनेन अन्वययुक्त्या, भानं यत्र वर्तते तत्रैव भास्यं भवति इति, यत्र यत्र भास्यं तत्र तत्र भानं वर्तते इति च ज्ञातव्यम्। व्यतिरेकः तु अभावः भवति। तद्यथा, साध्यसाधनानां साहचर्याभावः व्यतिरेकः। यत्र भानाभावः तत्र भास्यभावः इति व्यतिरेकः। अत्र, साध्यभावो भास्याभावः, साधनाभावो भानाभावः च भवति। अनेन व्यतिरेकयुक्त्या, यत्र भानं न वर्तते तत्र भास्यं न वर्तते, यत्र भास्यं न वर्तते तत्र भानमपि न वर्तते इति ज्ञायते।

तथापि आत्मा तु भानस्य विषयः न भवति इति निरूपयति-

**यथा दृग्दृश्यमात्मानं स्वयमात्मा न पश्यति।**
**अतो न भास्यते ह्यात्मा यं पश्यति स भास्यते।।(९)**

**अन्वयः-** यथा दृक् दृशं (तथा) आत्मा आत्मानं स्वयं न पश्यति। अतः आत्मा न भास्यते हि। आत्मा यं पश्यति स भास्यते।

यथा दृग्दृशं स्वयं न पश्यति, तथा आत्मा आत्मानं स्वयं न पश्यति। अतः आत्मा न भास्यते हि, आत्मा यं पश्यति स भास्यते।

आत्मा एव यं कमपि भानस्य विषयः न भवति। आत्मनः सन्निधानविषेशेण अन्येषां सर्वेषामपि वस्तुनः भानं भवति, तथापि आत्मा केवलः साक्षी इति, उपाधिरहित इति, एकः, अखण्ड इति, सर्वावस्थातीतः, सच्चिदानन्दस्वरूपः, निर्विकारः, वृत्तिशुन्यः इति, बुद्धिवृत्त्या अज्ञः इति भवतीत्यतः आत्मनि आत्मनः भानं न



SGOU

संभवति। यथा-दृग् दृश्यं पश्यति चेदपि दृशं न स्वयं पश्यति, तथा। यथा चक्षुः स्वयं चक्षुं न द्रष्टुं शक्यते तथैव आत्मा आत्मानं न पश्यति अतः भानमपि न भवति।

भानस्य विषयाः सर्वे अध्यस्ताः एव, अतः ते सर्वे असत्या इति, अनध्यस्तः आत्मा एक एव इति, अतः सत् भवति इति च दर्शयति अन्तिमे श्लोके-

**यद् भास्यते तदध्यस्तं अनध्यस्तं न भास्यते।**
**यदध्यस्तं तदसदप्यनध्यस्तं सदेव तत्।।(१०)**

**अन्वयः-** यद् भास्यते तद् अध्यस्तम्। अनध्यस्तं न भास्यते। यद् अध्यस्तं तद् असत्। अपि अनध्यस्तं तत् सद् एव।

यद् भास्यते तद् अध्यस्तं भवति। यद् अनध्यस्तं तत् न भास्यते। यद् अध्यस्तं तद् असत् भवति। यत् असत् अपि यद् अनध्यस्तं तत् सद् एव भवति।

स्थूलसूक्ष्मकारणतुर्य इति **चतुर्विधभानानां** विषयाः घटात् ब्रह्माहम् इति वृत्तिपर्यन्ताः सर्वमपि, रज्जुसर्पवत् अध्यस्तं भवति। यतः, **अध्यस्तं** नो चेत् न भास्यते हि। किन्तु, भास्यते चेत् तद् **किमिति** शङ्का चेत् तदध्यस्तमित्यतः असदेव। **अनध्यस्तः** पुनः क इति चेत्, तत् परं एकं सत् वस्तुरेव। तत् सत् परमार्थः नित्यं च। तद् भिन्नं किमपि न विद्यते।

इत्थम् अनेन भानदर्शनेन सिद्ध्यते यत्, इन्द्रियद्वारा अथवा अन्यप्रकारेण वा मनुष्यबुध्दिवृत्तौ भास्यमानाः पदार्थाः अयथार्थाः। सत् तु एक एव वस्तु बुध्दिवृत्तौ अभास्यमानं, भानाय अविषयकम्, अनध्यस्तं, तथापि भानादीनाम् आधारः, स्वयं निराधारः च आत्मा एव भवति।

एवं पञ्चमं दर्शनं भानदर्शनम् समाप्तम्।

## पुनरावृत्तिः (Recap)

- भानं द्विविधं- सामान्यं विशेषः।
- चतुर्विधं भानाश्रयं- स्थूलं सूक्ष्मं कारणं तुर्यं चेति।
- स्थूलमाश्रित्य यद्भानं स्थूलं तदिति मन्यते।
- कायो घट इति विशेषभानम्। अहमयमिति सामान्यभानञ्च।
- सूक्ष्माश्रयत्वतः, य सूक्ष्मम् इति मन्यते।
- अहम् अज्ञः इति यत् भानं, तत् कारणमिति उदाहृतम्।
- अहं ब्रह्म इति यत् भानं, तत् तुर्यमिति शंस्यते।
- यत्र भानं वर्तते तत्र भास्यं वर्तते। यत्र भानं न तत्र भास्यं न वर्तते।
- आत्मा यं पश्यति स भास्यते।
- यद् अध्यस्तं तद् असत्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भानं कतिविधम्?
2. भानाश्रयं कतिविधम्? के च ते?
3. ------वायवाः।
4. यत्र भानं न वर्तते तत्र______ न वर्तते।
5. _______ यं पश्यति स भास्यते।
6. यद् भास्यते तद् _______ भवति।
7. यद् अध्यस्तं तद्------।
8. अत्र, साध्यं भास्यं, साधनं-----च भवति।
9. यथा दृग्दृशं स्वयं न पश्यति, तथा आत्मा --------स्वयं न पश्यति।
10. दर्शनमालायाः पञ्चमदर्शनस्य नाम किं?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. वायवः कति सन्ति? के च ते?
2. स्थूलभानं किम्?
3. सूक्ष्मभानं किम्?
4. कारणभानं किम्?
5. तुर्यभानं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. मायाकृतं भानं विशदयत।
2. स्वप्नावस्थायामेव सूक्ष्मभानमनुभूयते। कुतः ?

SGOU

## निर्दिष्टाभ्यासः (Assignments)

1. भाना-भानाश्रय भेदाः निरूपयत।
2. भानं केन प्रकारेण संभवति, कथं वा तस्य निरासः गुरुणा प्रतिपाद्यते। लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. द्वे
2. चत्वारि
3. पञ्च
4. भास्यम्
5. आत्मा
6. अध्यस्तम्
7. असत्
8. भानम्
9. आत्मानं
10. भानदर्शनम्

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु
3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यू डेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यूडेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962


SGOU

## अधिकवाचनग्रन्थौ (Suggested Readings)


1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।
2. दर्शनमाला ( जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः


SGOU

# Unit - 3
# कर्मदर्शनम्

## उद्देश्यानि (Learning Outcomes)

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः।
- दर्शनमालायां कर्मणस्तत्त्वम् अद्वैतदृशा अवगाहते।

## प्राग्व्यपेक्षाः (Pre requisites)

दर्शनमालायां षष्ठ दर्शनं भवति कर्मदर्शनम् । अस्मिन् प्रकरणे कर्मणस्तत्त्वमद्वैतदृशा विचार्यते । साङ्ख्यदर्शने प्रकृतेः कर्तृत्वं पुरुषस्य भोक्तृत्वं च व्यवस्थापितम्। न्यायदर्शने आत्मनः कर्तृत्वं भोक्तृत्वं चेत्युभयमपि निरूपितम्। अद्वैतदर्शने एकमेवाऽद्वितीयं ब्रह्म - इति श्रीतप्रामाण्येन कर्तृत्वस्य भोक्तृत्वस्य वा वस्तुतः संभवो नास्तीति प्रतिपादितम्। व्यावहारिकदशायां प्रतीयमानं कर्तृत्वं भोक्तृत्वं वा मायामाश्रित्योपपद्यते ।

## मुख्यविषयाः(Key words)

तैजसः, कर्मणः, परमात्मना, चित्तेन्द्रियात्मा, सूक्ष्मशरीरं, अन्तकरणं,

## Discussions

**कर्मदर्शनम्**

**आत्मैव मायया कर्म करोति बहुरूपधृक्।**
**असंगः स्वप्रकाशोऽपि निद्रायामिव तैजसः।।(१)**
**मन्ये वदामि गृह्णामि श्रृणोमीत्यादि रूपतः।**
**क्रियते कर्म परमात्मना चित्तेन्द्रियात्मना।।(२)**
**आत्मैव कर्मणः पूर्वमन्यत् किञ्चिन्न विद्यते।**
**ततः स्वेनैव कर्माणि क्रियन्ते निजमायया।।(३)**
**शक्तिरस्त्यात्मनः काचिद्दुर्घटा न पृथक् स्वतः।**
**तयैवारोप्यते कर्म निखिलं निष्क्रियात्मनि।।(४)**
**सर्वदाऽसंग एवात्माऽज्ञतया कर्म संगिवत्।**
**करोति न करोमीति न ज्ञः कर्मसु सज्जते।।(५)**
**ज्वलति ज्वलनो वायुर्वाति वर्षति वारिदः।**

**धरात्मा सन् धरति खल्वेको वहति वाहिनी।।(६)**
**ऊर्ध्वं प्राणो ह्यधोऽपानः खल्वेको याति निष्क्रियः।**
**नाड्यन्तराले धमति क्रन्दति स्पन्दति स्थितः।।(७)**
**अस्ति जन्मर्द्धिपरिणत्यपक्षयविनाशनम्।**
**षड्भावमिह यो याति स नान्योऽविक्रियात्मनः।।(८)**
**स्वयं क्रियन्ते कर्माणि करणैरिन्द्रियैरपि।**
**अहं त्वसंगः कूटस्थ इति जानाति कोविदः।।(९)**
**दृश्यत्वाद्भास्यमहमप्यतोऽहं शुक्तिरंगवत्।**
**अध्यस्तमेक एवाद्य श्वोऽपि सर्वोपरि स्थितः।।(१०)**

लोके नानाविधानां कर्माणामाधारः क इति पर्यालोचने आत्मा एव, नान्यः इति सुप्रपिष्ठाप्यते 'कर्मदर्शनम्' इति अग्रिमदर्शनेन।

**आत्मैव मायया कर्म करोति बहुरूपधृक्।**
**असंगः स्वप्रकाशोऽपि निद्रायामिव तैजसः।।(१)**

**अन्वयः-** असंगः स्वप्रकाशः अपि निद्रायां तैजसः इव आत्मा एव बहुरूपधृक् मायया कर्म करोति।

आत्मा आकाश इव असंगः, सूर्य इव स्वप्रकाशः अपि तादृश आत्मा कर्म करोति इति न्यायदृष्टया असङ्गतमेव। किन्तु वस्तुतः आत्मा कर्मरहितः भवति। पुनः यः कर्म करोति इति चेत् माया इति वक्यव्यमस्ति। सा माया जडमित्यतः, आत्मसन्निधानं विना स्वयमेव न कर्म कर्तुं शक्ता भवति। अतः, आत्मसन्निधानविशेषेण कर्म कृत्वा, आत्मानः अनन्या माया इति, कर्म कर्तुं आत्मनः अत्यः न विद्यते इत्यतश्च, नानारूपाणि कर्माणि आत्मा एव करोति, अर्थात्, आत्मा हि मायया कर्मं कारयति इति। स्वप्नावस्थायाः सूक्ष्मशरीराभिमानी तैजसः चक्षुरादि बाह्यकरणैः विना तथापि बाह्यकरणैः इव बहुविधकर्माणि निद्रावस्थायां करोतीति सर्वेषामनुभवः भवति। तैजसस्य सर्वकर्माप्यपि निद्राकाले सत्यमिति भास्यते। निद्रां त्यक्त्वा जाग्रदवस्थां प्राप्ते सति, स्वप्ने तैजसेन कृतं सर्वम् असत्यमिति केवलभास्यमेवेति स्पष्टं भवति।

'बहुरूपधृक्' इत्यनेन सर्वकर्मभेदान् अन्तर्भावयति। य कोऽपि कर्म न आत्मनः अन्यः करोति इत्यर्थः।

अग्रिमश्लोके च इदमेव विशदीकरोति-

**मन्ये वदामि गृह्णामि श्रृणोमीत्यादि रूपतः।**
**क्रियते कर्म परमात्मना चित्तेन्द्रियात्मना।।(२)**

**अन्वयः-** चित्तेन्द्रियात्मना परमात्मना मन्ये, वदामि, गृह्णामि, श्रृणोमि, इत्यादिरूपतः कर्म क्रियते।

कर्मकरणे, आत्मा हि अन्तःकरणादीनां इन्द्रियादीनां च रूपेण कर्म करोति। यथा, आत्मा एक एव हि चित्तात्मा भूत्वा (अन्तःकरणादीनां रूपेण भूत्वा) 'अहं मन्ये' इति मननादिरुपकर्मणि, वागात्मा भूत्वा (वागिन्द्रियरूपेण भूत्वा) 'अहं वदामि' इति वचनरूपकर्माणि, पाण्यात्मा भूत्वा (पाणीति इन्द्रिययस्वरूपेण

SGOU

भूत्वा) 'अहं गृह्णामि' इति ग्रहणरूपकर्मणि, श्रोत्रात्मा भूत्वा (श्रोत्रेन्द्रियस्वरूपेण भूत्वा) 'अहं श्रृणोमि' इति श्रवणरूपकर्माण्यपि करोति। 'मन्ये वदामि.....इत्यादि' इत्यदिना उत्क्षेपण-अपक्षेपण-आकुञ्चन-प्रसारण-गमनानि इति पञ्चविधकर्माणि निर्दिशते। आत्मनः अन्यः न विद्यते, अचेतनस्य कस्यचित् (अनात्म)वस्तुनः कर्तृत्वं न भवेदिति, चेतनः परमान्मः एव चित्तेन्द्रियात्मा भूत्वा कर्म करोति इत्युच्यते।

आत्मनः हि सर्वकर्माणि संजायन्ते इति युक्त्या अग्रिमश्लोके उच्यते। यथा, कर्मणः प्राक् आत्मानं विना नान्यत् विद्यते इत्यतः सर्वकर्माणाम् आत्मा एक एव कर्त्ता भविष्यति इति-

**आत्मैव कर्मणः पूर्वमन्यत् किञ्चिन्न विद्यते।**
**ततः स्वेनैव कर्माणि क्रियन्ते निजमायया।।(३)**

**अन्वयः-** कर्मणः पुर्वम् आत्मा एव विद्यते। अन्यत् किञ्चित् न। ततः स्वेन एव निजमायया।

कर्मणः पूर्वम् आत्मा एव विद्यते। अन्यत् किञ्चित् न। ततः स्वेन एव निजमायया कर्माणि क्रियन्ते।

कर्मणः उत्पत्तेः प्राक् आत्मा एव विद्यते इत्यतः, तदनन्तरमपि कर्माणि आत्मानः अन्यात् न भवतीति। वृक्षोत्पत्तेः पूर्वं बीज एव आसीत् इति बिजादेव वृक्षः जायते इति पृथक् वक्तव्यं नास्ति खलु। 'सदेवसौम्येदमग्र आसित् आत्मा वा इदमेकमेवाग्र आसीत्' इत्यादिश्रुतेः। 'अन्यत् किञ्चिन्नविद्यते' इत्यदिना ब्रह्मणः जगतः अभिन्ननिमित्तोपादानत्वं निर्दिशति। यथा, कर्मणः कर्ता सामाग्रिः च सर्वम् आत्मा एव इत्यर्थः। तथापि 'निजमायया' इत्यादिना आत्मा निष्क्रियः इति, माया वस्तुतः न विद्यतेत्यतः तया क्रियमाणानि कर्माण्यपि न विद्यते इति च सूचयति।

सा माया आत्मनः शक्तिः, अतः निष्क्रिये ब्रह्मणि कर्माणि आरोप्यते एव इति च विशदीकरोति-

**शक्तिरस्त्यात्मनः काचिद्दुर्घटा न पृथक् स्वतः।**
**तयैवारोप्यते कर्म निखिलं निष्क्रियात्मनि।।(४)**

**अन्वयः-** आत्मानः स्वत न पृथक् दुर्घटा काचिद् शक्तिः अस्ति। तया एव निखिलं कर्म निष्क्रियात्मनि आरोप्यते।

आत्मा निष्क्रियः इत्यतः न कोऽपि कर्म आत्मनि युज्यते। पुनः कथम् आत्मा कर्म करोतीति चेत् माया एव सकलकर्माणां कारणमिति वक्तव्यम्। सा माया आत्मनः शक्तिः भवति। स्वयमेवाचेतना इयं शक्तिः कर्म करोति इत्यत्र असङ्गत्वम्। आत्मानं विना अन्यत् न भवेदित्यतः माया अपि आत्मनः अभिन्ना इति कल्पनीयम्। परमार्थे तु सा न विद्यते। एकप्रकारेण कर्तृत्वयुक्ता, अन्यप्रकारेण जडा, तथैव अकर्तृत्वयुक्ता, एकप्रकारेण अस्तित्वयुक्ता, अन्यप्रकारेण अस्तित्वरहिता, पर्यालोचने अस्तीति नास्तीति च निश्चेतुम् अशक्या, केनापि वस्तुना अप्राप्यात्मनि स्वयं स्थिता, तथापि आत्मनि अस्थिता, एकंविधौ आत्मभिन्ना, अन्यंविधौ आत्माभिन्ना, केनापि प्रकारेण स्वरूपेण अवर्णनीया च भवतीत्यतः एव इयं शक्तिः 'दूर्घटा' इति 'अनिर्वचनीया' इति 'अघटितघटनापटियसि' इति वा कथ्यते। इयमात्मशक्तिरेव निष्क्रियात्मनि सर्वकर्माणि आरोप्यते। एषा एव शक्तिः इच्छा, ज्ञानं, क्रिया इति त्रिविधैः भूत्वा असङ्गम् आत्मानं कर्ता इति, अकर्ता इति, सर्वस्वरूपः इति च

करोति। आत्मा इच्छाशक्त्याश्रयेः कर्ता भवति, ज्ञानशक्त्याश्रये केवलसाक्षी अकर्ता। क्रियाशक्त्याश्रये सर्वस्वरूपः च भवति।

परमार्थावस्थायाम् आत्मा सर्वकर्मरहितः इति सर्वदा असंग इति अज्ञताहेतुना संगिवत् भास्यतेति च निरूपयति-

**सर्वदाऽसंग एवात्माऽज्ञतया कर्म संगिवत्।**
**करोति न करोमीति न ज्ञः कर्मसु सज्जते।।(५)**

**अन्वयः-** आत्मा सर्वदा असङ्गः एव। अज्ञतया संगिवत् कर्म करोति। ज्ञः 'न करोमि इति' कर्मसु न सज्जते।

अत्र, 'आत्मा' शब्देन जीवात्मपरमात्मानम् अभेदेन निदिर्शति। परमात्मा इव जीवात्मा अपि सर्वदा असङ्गः एव। जीवात्मनः अज्ञतया एव तस्य, परमात्मनः च कर्मणि संगः अस्तीति भास्यते। किन्तु ज्ञानिनां तु कर्म करोति चेदपि स्वयं किमपि कर्म करोतीति दृढचिन्ता भविष्यति। तेषां तु कदापि कर्मसंगः भविष्यति। "कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः, स बुध्दिमान् मनुष्येषु स युक्त कृत्स्नकर्मकृत्" इति भगवद्गीतायां तमेव ज्ञानिनमेव प्रशंसितमस्ति। वस्तुतः आत्मनि कोऽपि न कर्म विद्यते; अस्तीति भास्यमाने कर्मणि आत्मानः संगोऽपि नास्ति। पुनः एतानि कर्माणि कुतः भास्यते? कः करोति? कस्मिन्नाधारे तिष्ठति? इत्यादि शङ्का चेत्, आत्मनः अन्यः किञ्चिदपि स्थानं न वर्तत इत्यतः, यस्य कस्यापि अन्य-आधारः न विद्यतेत्यतः च सर्वकर्माणि आत्मनि एव भास्यते इति, आत्मा हि सर्वकर्माणां कर्ता इति, सर्वकर्माणाम् आधारः आत्मा एव इति अथवा आत्मा हि सर्वस्वरूपः कर्ता भवति इति च समाधानम्।

अग्रिमश्लोके इयमेव वस्तुता विशदीकरोति-

**ज्वलति ज्वलनो वायुर्वाति वर्षति वारिदः।**
**धरात्मा सन् धरति खल्वेको वहति वाहिनी।।(६)**

**अन्वयः-** एकः खलु ज्वलनो ज्वलति वायुः वाति वारिदः वर्षति धरात्मा धरति वाहिनि सन् वाहिनी।

एकः खलु ज्वलनः सन् ज्वलति, वायुः सन् वाति, वारिदः सन् वर्षति, धरात्मा सन् धरति, वाहिनी सन् वहति च।

एकमेव परमात्मा हि पञ्चभूतात्मा इति पञ्चभूतविकाराः इति च दृश्यमानानां सर्ववस्तूनां रूपेण स्थूलं भूत्वा सर्वकर्माणि करोति इत्यर्थः।

अथ, शरीरान्तर्वर्त्तिनः प्राणापानादिरूपेण सूक्ष्मं भूत्वा आत्मा एव शरीरं प्रापयति इति उच्यते-

**ऊर्ध्वं प्राणो ह्यधोऽपानः खल्वेको याति निष्क्रियः।**
**नाड्यन्तराले धमति क्रन्दति स्पन्दति स्थितः।।(७)**

**अन्वयः-** एकः खलु निष्क्रियः स्थितः प्राणः ऊर्ध्वम्, अपानः अधः याति, नाड्यन्तराले धमति, क्रन्दति, स्पन्दति हि।

एकः खलु निष्क्रियः स्थितः प्राणः सन् ऊर्ध्वम्, अपानः सन् अधः च याति, नाड्यन्तराले धमति, क्रन्दति, स्पन्दति हि।

शरीरस्यान्तः प्राणादि नानारूपेण स्थित्वा श्वासोच्छवासादि नानाव्यापाराणि कुर्वन्नपि आत्मा एकः निष्क्रियः च भवतीत्यर्थः।

अग्रिमश्लोके अविक्रियः आत्मा हि षड्विधविकारान् प्रापयतीति उच्यते-

**अस्ति जन्मर्द्धिपरिणत्यपक्षयविनाशनम्।**
**षड्भावमिह यो याति स नान्योऽविक्रियात्मनः॥(८)**

**अन्वयः-** इह यः अस्तिजन्मर्द्धिपरिणत्यपक्षयविनाशनं स अविक्रियात्मनः अन्यः न।

इह लोके दृश्यमानाः सर्वपदार्थाः षड्विकारैर्युक्ताः भवन्ति। विकारयुक्ताः सर्वे अन्ते नश्यन्ति, वस्तुतः न विद्यते च। किन्तु वास्तविके, सर्वपदार्था अस्तीति भाति, विकारं प्रापयति च यतः इति चेत् निर्विकारेण सत्तामात्रस्वरूपेण स्थितेन आत्मन एव भवति। तमात्मानम् आश्रित्या एव षड्विकारयुक्तप्रपञ्चः अत्र वर्तते। आत्मानं विना न प्रपञ्चः। अतः अविक्रियः आत्मा षड्विकारैः युक्तः प्रपञ्चः इति उच्यते।

तथापि, वस्तुतः आत्मा असंगः, निर्विकारः इति तत्त्वं विद्वानः एव जानाति इति अग्रिमश्लोके कथयति-

**स्वयं क्रियन्ते कर्माणि करणैरिन्द्रियैरपि।**
**अहं त्वसंगः कूटस्थ इति जानाति कोविदः॥(९)**

**अन्वयः-** करणैः इन्द्रियैः अपि कर्माणि स्वयं क्रियन्ते। कोविदः तु अहम् असंगः कूटस्थः इति जानाति।

मनोबुद्ध्यहंकारचित्तैः अन्तकरणैः, श्रोत्राद्यैः इन्द्रियैः अपि कर्माणि स्वयं क्रियन्ते। कोविदः तु 'अहं असंगः कुटस्थः' इति जानाति।

आत्मा न कर्म करोति पुनः, अन्तःकरणानि इन्द्रियाणि कर्म करोतीति उच्यते तर्हि, तानि जडानि अत कर्म कर्तुं न शक्यते। तानि कर्म सामग्रीः एव भवन्ति। किन्तु, स्वयमेव संभवति इति दृश्यते। सर्वकर्माणि आत्मसन्निधाने हि संभवति चेदपि, आत्मा वस्तुतः न कर्म करोति। आत्मा असंगः कूटस्थः भवति। ऊहापोविचक्षणः आत्मज्ञानि एतां वस्तुतां सम्यक् विजानाति।

सर्वकर्माणि, तेषां साक्षी अहंकारवृत्तिः च अध्यस्तम् अस्तीति, सवोपरि अध्यस्तः भुत्वा नित्यः एकः परमात्मा एव अस्तीति च प्रदर्श्य 'कर्मदर्शनम्' उपसंहरति-

**दृश्यत्वाद्भास्यमहमप्यतोऽहं शुक्तिरंगवत्।**
**अध्यस्तमेक एवाद्य श्वोऽपि सर्वोपरि स्थितः॥(१०)**

**अन्वयः-** अहंम् अपि दृश्यत्वात् भास्यम्। अतः अहं शुक्तिरंगवत् अध्यस्तम् अद्य श्वोपि सर्वोपरिस्थितः एकः एव।

अहंम् अपि दृश्यत्वात् भास्यं भवामि। अतः अहं शुक्तिरंगवत् अध्यस्तम्। अद्य श्वोपि सर्वोपरिस्थितः एकः एव।

'यद्भास्यते तदध्यस्तम्' इति पूर्वमेवोक्तमस्ति। यथा, भास्यमानाः सर्वे वस्तुतः न विद्यन्ते, तथापि ते सत्वे केऽपि आधारे भास्यन्ते। अत्र शुक्तिरजतम् उदाहृतमस्ति। शुक्तिकायां रजताध्यासे, रजतस्य तत्राभावेऽपि अस्तीति भास्यते। तथापि अविद्यमानरजतं विद्यमानायां शुक्तिकायां आधारे भास्यते। तथैव सर्वकर्माणि, तेषां

कारणभूतः अहंकारः च एकस्वरूपे परमात्मनि अध्यस्ताः भवन्ति। परमात्मा एव वस्तुतः वर्तते, स एकः नित्यः इति, कर्मरूपप्रपञ्चः अविद्यमानः परमात्मनि अध्यास्यरूपेण भास्यमानः इति चार्थः। 'सर्वोपरिस्थितः' इत्यादिना, आत्मा केवलः निष्प्रपञ्चः, कर्मरहितः, देशकालसुखदुःखाद्यतीतः, परमोत्कृष्टः इति च सिद्ध्यति।

एवं षष्ठं दर्शनं कर्मदर्शनं समाप्तम्।

## पुनरावृत्तिः (Recap)

- निद्रायामिव तैजसः आत्मैव मायया कर्म।
- क्रियते कर्म परमात्मना चित्तेन्द्रियात्मना।
- आत्मैव कर्मणः पूर्वम्। ततः स्वेनैव कर्माणि क्रियन्ते निजमायया।
- तयैवारोप्यते कर्म निखिलं निष्क्रियात्मनि।
- सर्वदाऽसंग एवात्माज्ञतया कर्मसंगिवत्।
- एको वहति वाहिनी।
- नाड्यन्तराले धमति, क्रन्दति, स्पन्दति स्थितः।
- स नान्योऽविक्रियात्मनः।
- अहं त्वसंगः कूटस्थ इति जानाति कोविदः।
- अध्यस्तमेक एवाद्य श्वोऽपि सर्वोपरि स्थितः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. निद्रायां क इव आत्मा बहुरूपधृक् मायया कर्म करोति?
2. वदामि, गृह्णामि इत्यादिरूपतः कः मन्ये, कर्म करोति च?
3. कः कर्मणः पूर्वं विद्यते?
4. कया निखिलं कर्म निष्क्रियात्मनि आरोप्यते?
5. असंगः आत्मा अज्ञतया क इव कर्म करोति?
6. निष्क्रियः स्थितः प्राणः ------भवति।
7. अधो वायुः कः?
8. षष्टं दर्शनं नाम किम्?
9. कः 'अहम् असंगः कूटस्थः' इति जानाति?
10. अहं किवत् अध्यस्तं भवति?

SGOU

## एकेन वाक्येनद्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. षठ्भावविकाराः लिखत।
2. को विदः तु अहम् असंगः कूटस्थः इति जानाति। किम्?
3. अध्यस्तं नाम किम्?
4. अन्तकरणचतुष्टयानि कानि?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. 'खल्वेको याति निष्क्रियः', विशदयत।
2. 'स नान्योऽविक्रियात्मनः', विशदयत।
3. आत्मनः शक्तिः निष्क्रिये ब्रह्मणि कर्माणि आरोप्यते । विशदीकरोति।

## निर्दिष्टाभ्यासाः (Assignments)

1. आत्मनः बहुरूपधारणं अनेकक्रियाकर्तृत्वेहेतुतया विव्रुणुते।
2. दर्शनमालां अधिकृत्य कर्मदर्शनं प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. तैजसः
2. परमात्मना
3. आत्मैव
4. आत्मनः शक्त्या
5. संगिवत्
6. ऊर्ध्वम्
7. अपानः
8. कर्मदर्शनम्
9. कोविदः
10. शुक्तिरंगवत्

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु
3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यू डेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यूडेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962


## अधिकवाचनग्रन्थौ (Suggested Readings)


1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।
2. दर्शनमाला ( जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः


SGOU

# Unit - 4
# ज्ञानदर्शनम्

## उद्देश्यानि(Learing outcomes)

- श्रीनारायणगुरोः दर्शनस्य बोधनम्।
- अद्वैतवेदान्तदर्शनस्य अवगतिः।
- ज्ञानस्वरूप आत्मा इति अद्वैतवेदान्तिनां मतम् जानाति।
- आत्मनःस्वरूपम् अवगच्छति।

## प्राग्व्यपेक्षाः (Pre requisites)

कर्मदर्शनानन्तरं ज्ञानदर्शनमारभ्यते । ज्ञानस्वरूप आत्मा इति अद्वैतवेदान्तिनां निर्णयो भवति । अथापि व्यवहारे ज्ञानं बहुधा प्रकल्प्यते। अतो ज्ञानमधिकृत्य विशदं निरूपणमावश्यकं भवति । तदर्थमेव ज्ञानदर्शनाख्यमिदं प्रकरणं प्रस्तूयते ।

## मुख्यविषयाः(Key words)

निरूपाधिकम्, सोपाधिकम्, अहङ्कारम्, प्रत्यक्षज्ञानम्, वृत्तिः, ज्ञानदर्शनम्

## Discussions

### ज्ञानदर्शनम्

ज्ञानमेकं हि निरूपाधिकं सोपाधिकं च तत्।
अहङ्कारादिहीनं यज्ज्ञानं तन्निरुपाधिकम्।।(१)
अहन्तयाऽन्तर्बहिरस्ति यदेवमिदन्तया।
भानवृत्त्याऽन्वितं यत्तु ज्ञानं सोपाधिकं मतम्।।(२)
अनात्मनामहङ्कारादीनां येनानुभूयते।
साक्षी तदात्मज्ञानं स्याद्येनैवामृतमश्यते।।(३)
अहंकारादि कार्यं यदनात्मकमसंख्यकम्।
येनावगम्यतेऽनात्मज्ञानं तदवधार्यते।।(४)
यथावद्वस्तुविज्ञानं रज्जुतत्त्वावबोधवत्।
यत्तद्यथार्थविज्ञानमयथार्थमतोऽन्यथा।।(५)
यत्सन्निध्यादेव सर्वं भासते स्वयमेव तत्।
प्रत्यक्षज्ञानमिति चापरोक्षमिति लक्ष्यते।।(६)
ययाऽनुसाधकं साध्यं मीयते ज्ञानरूपया।

SGOU

**वृत्त्या साऽनुमितिस्साहचर्यसंस्कारजन्यया।।(७)**
**गत्वा समीपं मेयस्य मीयते श्रुतलक्षणः।**
**यया संवित्सोपमितिर्मृगोऽयमिति रूपया।(८)**
**अहं ममेतिज्ञानं यदिदं तदिति यच्च तत्।**
**जीवज्ञानं तदपरमिन्द्रियज्ञानमिष्यते।(९)**
**ओं तत् सदिति निर्दिष्टं ब्रह्मात्मैक्यमुपागतम्।**
**कल्पनादिविहीनं यत्तत्परज्ञानमीर्यते।।(१०)**

आत्मा ज्ञानस्वरूपः। नानाप्रकारेण दृश्यमानः कर्मरूपप्रपञ्चः ज्ञानस्य विविधप्रकारसङ्केतः भवति। सर्वं हि चिद्विलासः इत्यदेव हि प्रपञ्चस्य तत्त्वम्। तत्प्रकारस्य ज्ञानस्य सम्यक् निरूपणार्थं 'ज्ञानदर्शनम्' इति प्रकरणमारभ्यते-

**ज्ञानमेकं हि निरूपाधिकं सोपाधिकं च तत्।**
**अहङ्कारादिहीनं यज्ज्ञानं तन्निरुपाधिकम्।।(१)**

**अन्वयः-** ज्ञानम् एकं निरूपाधिकं हि सोपाधिकं च तत्। यत् ज्ञानम् अहङ्कारादिहिनं तत् निरूपाधिकम्।

प्राणिषु चैतन्यरूपेण भुत्वा सर्वेषां बुध्यां प्रकाशमानविद्या एव 'ज्ञानम्' इत्युच्यते। आत्मलक्षणं तत् ज्ञानं तस्य यथार्थस्वरूपे एकं, बुध्दिवृत्त्यादि उपाधिभिः युक्तं च भवति। तथापि व्यवहारे अहङ्करादि बुध्दिवृत्तिभिः संबन्धेन तत् सोपाधिकं भवति। अहंकारादिभिः असंबन्धे तत् निरूपाधिकं च भवति।

सोपाधिज्ञानं निरूपयति-

**अहन्तयाऽन्तर्बहिरस्ति यदेवमिदन्तया।**
**भानवृत्त्याऽन्वितं यत्तु ज्ञानं सोपाधिकं मतम्।।(२)**

**अन्वयः-** यत् अहन्तया भानवृत्त्या अन्वितम् अन्तः, एवं यत् तु इदन्तया भानवृत्त्या अन्वितं बहिः च अस्ति, तत् ज्ञानं सोपाधिकम् इति।

ज्ञानस्योपाधिः वृत्तिः भवति। सा वृत्ति पूर्वं भानदर्शने प्रोक्तवत्, सामान्यविशेषरूपेण स्थूलसूक्ष्मादिभेदैः सह वर्तते। बहिः 'अयं घटः, अयं पटः' इत्यारभ्य अन्तः 'अहं ब्रह्म' इति पर्यन्ताः सर्ववृत्तयः तेषु भेदेष्वन्तर्भवन्ति। सर्वाः वृत्तयः ताः विषयीकृत्य स्थितस्य तस्य एकज्ञानस्य उपाधयः एव भवन्ति। तत् ज्ञानं तु परमार्थे निरूपाधिकं चेदपि, वृत्तयः उपाधयः इत्यत तत् सोपाधिकज्ञानम् इत्युच्यते।

अग्रिमश्लोके निरुपाधिकम् आत्मज्ञानं कथयति-

**अनात्मनामहङ्कारादीनां येनानुभूयते।**
**साक्षी तदात्मज्ञानं स्याद्येनैवामृतमश्यते।।(३)**

**अन्वयः-** अनात्मनाम् अहङ्कारादीनां साक्षी येन अनुभूयते, येन एव अमृतम् अश्यते, तत् आत्मज्ञानं स्यात्।

सर्वजीवराशेः अन्तः, सुषुप्तिकाले सूक्ष्मभावेन ज्ञाताः अहंकारात्, व्यवहारदशायां दृश्यमानाः घटपटादि पर्यन्ताः सर्वान् अनात्मवस्तून् निर्विकारेण दर्शयन्तः एकः साक्षी भवति। सः साक्षी आत्मा एव हि। साक्षीरूपः

स आत्मा यस्मात् ज्ञानात् ज्ञायते तत् आत्मज्ञानमित्युच्यते। आत्मज्ञानेनैव मोक्षानुभवः संभवति इति वेदान्तसिद्धान्तः। 'एव' इति मोक्षप्राप्तौ आत्मज्ञानस्य मुख्यसाधनतां दर्शयति। इदं ज्ञानं निरुपाधिकज्ञानमिति च उच्यते।

अग्रिमपद्ये सोपाधिकम् अनात्मज्ञानं विशदीकरोति-

**अहंकारादि कार्यं यदनात्मकमसंख्यकम्।**
**येनावगम्यतेऽनात्मज्ञानं तदवधार्यते।।(४)**

**अन्वयः-** यत् अनात्मकम् असंख्यकम् अहंकारादिकार्यं तत् येन अवगम्यते, तत् अनात्मज्ञानम् इति अवधार्यते।

पूर्वश्लोकोक्तवत्, अहंकारादिकार्याणि अनात्मकानि असंख्यकानि च भवन्ति। ते सर्वे ज्ञेयविषयाः भवन्ति। तान् सर्वान् ज्ञात्वा स्थितं साक्षिणम् आत्मानम् अनवगम्य, तानेव केवलं ज्ञापयतीति ज्ञानं पूर्वोक्त आत्मज्ञानस्य विपरीतम् अनात्मज्ञानं भवतीत्यर्थः। इदम् अनात्मज्ञानं सोपाधिकं भवति।

किन्तु, अहंकारादिकार्याणां च यथार्थम् अयथार्थमिति द्विविधज्ञानविभागः अस्ति। तेऽपि सोपाधिकाः भवन्ति। अग्रिमश्लोके तानधिकृत्य उच्यते-

**यथावद्वस्तुविज्ञानं रज्जुतत्त्वावबोधवत्।**
**यत्तद्यथार्थविज्ञानमयथार्थमतोऽन्यथा।।(५)**

**अन्वयः-** रज्जुतत्त्वावबोधवत् यथावद्वस्तुविज्ञानं यद्, तत् यथार्थविज्ञानम्, अतः अन्यथा अयथार्थं च भवति।

रज्जुतत्त्वयथार्थमयथार्थञ्च द्वेप्रकारज्ञाने भवतः। रज्जुं यथार्थतया रज्जु इति ज्ञानं यथार्थज्ञानम्, तामेव रज्जुं, नेत्रदोषादिभिः कारणैः, सर्पादिकम् इति विपरीतज्ञानम् अयथार्थज्ञानं च भवति, तथैव, एकवस्तुं यथा विद्यते तथैव ज्ञायतेति यथार्थज्ञानम्, विपरीततया ज्ञायते चेत् अयथार्थज्ञानं च भवतीत्यर्थः। द्वयमपि सोपाधिकं भवति।

पुनः कथ्यते-

**यत्सान्निध्यादेव सर्वं भासते स्वयमेव तत्।**
**प्रत्यक्षज्ञानमिति चापरोक्षमिति लक्ष्यते।।(६)**

**अन्वयः-** यत्सान्निध्यादेव सर्वं स्वयमेव भासते तत् प्रत्यक्षज्ञानम् इति अपरोक्षम् इति च लक्ष्यते।

एकवस्तुनः यथार्थज्ञानं हि अनुमान-आप्तवाक्यादिभिः, तस्य वस्तुनः करणानां च साक्षात् संबन्धेन, च संभवति। प्रथमप्रकारकं ज्ञानं प्रतिबन्धयुक्तं भवति। तस्य परोक्षज्ञानमिति नाम। द्वितीयप्रकारकं तु प्रत्यक्षज्ञानमिति अपरोक्षज्ञानमिति च नाम। तत्तु प्रतिबन्धरहितं ज्ञानं भवति। अनेन ज्ञानेन एव अयं वस्तुनः यथार्थं साक्षात् अनुभूयामः। एतदपि सोपाधिकं हि।

अग्रिमश्लोके अनुमितिज्ञानं निर्वचति-

**ययाऽनुसाधकं साध्यं मीयते ज्ञानरूपया।**
**वृत्त्या साऽनुमितिस्साहचर्यसंस्कारजन्यया।।(७)**

**अन्वयः-** यया साहचर्यसंस्कारजन्यया ज्ञानरूपया वृत्त्या अनुसाधकं साध्यं मीयते सा अनुमितिः।

उचितहेतुना (लिङ्गैः) अनुमीय-ज्ञायते यत् ज्ञानं तदनुमितिज्ञानम्। महानसे धूमं दृष्ट्वा तत्र अग्निम् अनुमीयते। यदा यदा धूमं पश्यति तदा तदा तत्र अग्निरपि भविष्यतीति नित्यपरिचयेन अनुमीयते। एवं, यत्र यत्र धूमः तत्र तत्र अग्निः इति ज्ञानं यत् तत् साहचर्यज्ञानं भवति। तत्तु महानसस्य धूमवह्निसाहचर्यं (नित्यसंबन्धं) संस्कारेण जायते इत्यतः साहचर्यसंस्कारमित्युच्यते। तस्मात् साहचर्यसंस्कारात् यत् ज्ञानं जायते तत् वृत्तिरूपं भवति। अनेन **वृत्तिरूपसाहचर्यसंस्कारजन्यज्ञानेन**, पर्वतादिषु धूमं दृष्ट्वा तत्रापि अग्निरस्ति इति अनुमीयते। एवंप्रकारेण अनुमानेन जन्यं ज्ञानम् अनुमितिज्ञानमित्युच्यते। अत्र साध्यम् अग्निः साधकं धूमः च भवति। साध्यम् अग्निः तमनुगुण धूम इति साधकेन अनुमीयते, तथा जन्यं ज्ञानं हि अनुमिति ज्ञानम्।

अथ उपमितिज्ञानं निरूपयति-

**गत्वा समीपं मेयस्य मीयते श्रुतलक्षणः।**
**यया संवित्सोपमितिर्मृगोऽयमिति रूपया।(८)**

**अन्वयः-** मेयस्य समीपं गत्वा श्रुतलक्षणः मृगः अयम् इतिरूपया यया वृत्त्या मेयः मीयते, सा संवित् उपमितिः।

मृगम् अदृष्टः एकः, तं दृष्टवन्तं श्रुत्वा, तस्य विवरणपुस्तकान् पठित्वा वा, मृगलक्षणान् मनसि धृत्वा, यथा, मृगः इति पशवेष्वेकः एवमेवं लक्षणयुक्तः अन्यान्यमृगवत् सदृशः इत्यादि उपमानलक्षणैः गृहीत्वा, तस्य मृगस्य वासस्थानं वनं गत्वा **मृगमपश्यत्**। तथा 'श्रुतियुक्तलक्षणैर्युक्तः मृगोऽयम्' इति वृत्तिरूपज्ञानं तस्य जायते। तथा जन्यं ज्ञानम् उपमितिज्ञानं भवति। मेयः इत्यस्य विषयः अथवा उपमेयः इत्यर्थः। 'गोसदृशः गवयम्' इत्यत्र 'गो' इति उपमानम्, 'गवयम्' इति उपमेयं च भवति। एवं सर्वत्र उपमानेन उपमेयं ज्ञायते चेत् तत् ज्ञानं हि उपमितिज्ञानमिति विज्ञायते।

अग्रिमश्लोके, सर्वविधज्ञानान् सामान्येन जीवज्ञानम् इति, इन्द्रियज्ञानमिति द्विधा संगृह्योच्यते-

**अहं ममेतिज्ञानं यदिदं तदिति यच्च तत्।**
**जीवज्ञानं तदपरमिन्द्रियज्ञानमिष्यते।(९)**

**अन्वयः-** अहं मम इति ज्ञानं यत् तत् जीवज्ञानम्, अपरम् इदं तत् इति ज्ञानं यत् तत् इन्द्रियज्ञानं च इष्यते।
जीवस्य स्वस्य 'अहम्' इति 'मम' इति यत् ज्ञानं तत् श्रोत्रादि इन्द्रियाणां साहाय्यं विना जायते। बधिरः, अन्धः इत्यादयः इन्द्रियविकलाः अपि अन्यै इव 'अहम्' इति 'मम' इति व्यवहारः करोतीति लोके प्रसिद्ध एव। 'अहम्' इति 'मम' इति व्यवहारस्य हेतुः ज्ञानं केवलं जीवपरकमित्यतः तत् जीवज्ञानमित्युच्यते। यत् अहन्ताममतादीन् विहाय अन्येन्द्रियगोचरान् विषयान् 'इदम्' इति 'तत्' इत्यादि ज्ञानं तत् इन्द्रियज्ञानमित्युच्यते।

अग्रिमे श्लोके, सर्वेषामुपरि ब्रह्मज्ञानं, तत् निरूप्य ज्ञानदर्शनम् उपसंहरति-

**ओं तत् सदिति निर्दिष्टं ब्रह्मात्मैक्यमुपागतम्।**
**कल्पनादिविहीनं यत्तत्परज्ञानमीर्यते।।(१०)**

**अन्वयः-** ओं तत् सत् इति निर्दिष्टं ब्रह्मात्मैक्यम् उपागतं कल्पनादिविहीनं यत्, तत् परज्ञानम् इति ईर्यते।

प्रथमश्लोकोक्तम् एकं निरूपाधिकज्ञानं हि अत्र उपसंहारश्लोके च कथयति। 'ओं' इति ज्ञानस्वरूपं ब्रह्मं पूर्ववरिष्ठैः ऋषिभिः कल्पितमस्ति। 'ओमित्येतत्' , 'ओमिति ब्रह्म' , 'ओमित्येकाक्षरं ब्रह्म' इत्यादिभिः ओकारं ब्रह्मपरार्थे प्रदर्श्य श्रुतिस्मृतिपुराणादिषु उद्घोषितमस्ति। अथवा अखण्डं ज्ञानं हि ओंकारम्। तदेव ब्रह्म। 'तस्य वाचकः प्रणवः' इति पतञ्जलिः।

## पुनरावृत्तिः (Recap)

- ज्ञानमेकं हि निरूपधिकं सोपाधिकं च तत्।
- अहंकारादिहीनं यज्ज्ञानं तन्निरूपाधिकम्।
- भानवृत्त्यान्वितं यत्तुज्ञानं सोपाधिकम्।
- तदात्मज्ञानं स्याद्येनैवामृतमश्यते।
- येन अहंकारादिकार्यं यदनात्मकमसंख्यकम् अवगम्यते तदनात्मज्ञानम्।
- यथार्थविज्ञानम् अयथार्थविज्ञानम्।
- प्रत्यक्षज्ञानम् अपरोक्षमिति लक्ष्यते।
- अनुमितिः।
- उपमितिः।
- अहं ममेति ज्ञानं जीवज्ञानम् अपरमिन्द्रियज्ञानम्।
- ओं तत् सत् इति निर्दिष्टं ब्रह्मात्मैकमुपागतं ज्ञानं परज्ञानम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. ज्ञानं कतिविधम्?
2. यत् ज्ञानम् अहङ्कारादिहीनं तत् --------।
3. ज्ञानस्योपाधिः ------भवति। ।
4. वृत्तयः उपाधयः इत्यत तत् --------ज्ञानम् इत्युच्यते।
5. आत्मज्ञानेनैव किं संभवति।
6. ------सोपाधिकं भवति।
7. अहंकारादिकार्याणां कति ज्ञानविभागः?
8. यत्सान्निध्यादेव सर्वं स्वयमेव भासते तत् -------इति।
9. साहचर्यसंस्कारात् यत् ज्ञानं जायते तत् -----भवति।
10. सर्वत्र ------उपमेयं ज्ञायते।

SGOU

## एकेन वाक्येनद्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. निरुपाधिकं किम्?
2. सोपाधिकं किम्?
3. प्रत्यक्षज्ञानं किम्?
4. साहचर्यज्ञानं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. अनात्मज्ञानं किमिति विशदयत।
2. आत्मज्ञानं किमिति विशदयत।
3. सोदाहरणं यथार्थायथार्थज्ञानं लिखत।
4. उपमितिज्ञानं निरूपयत।
5. अनुमितिज्ञानं सोदाहरणं विशदयत।
6. जीवज्ञान इन्द्रियज्ञानयोः मिथः भेदः कः?

## निर्दिष्टाभ्यासाः **(Assignments)**

1. निरुपाधिकसोपाधिक भेदेन ज्ञानं विशदयत।
2. ज्ञानविभागः प्रदर्शयत।
3. अनुमितिज्ञानं उपमितिज्ञानं च निरूपयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि**(Answer to Objective type questions)**

1. द्वे
2. निरूपाधिकम्
3. वृत्तिः
4. सोपाधिक
5. मोक्षानुभवः

SGOU

6. अनात्मज्ञानं
7. द्वे
8. प्रत्यक्षज्ञानम्
9. वृत्तिरूपं
10. उपमानेन

## सूचनाग्रन्थाः (References)


1. दर्शनमाला – श्रीनारायणगुरुः।
2. द फिलोसफि ओफ् नारायणगुरु
3. मुनि नारायण प्रसाद्, नारायणगुरुकुलपब्लिकेषन्स्
4. दर्शनमाला ओफ् श्रीनारायणगुरुः - रामन्करुणाकरन्- श्रीशङ्करविद्यापीठम्, 1983
5. गार्लन्ड् ओफ् विषन्स्- दर्शनमाला ओफ् श्रीनारायणगुरु- नारायणगुरु, नारायणप्रसाद् (ट्रान्स्लेटर)- डी के प्रिन्ट् वेल्ड्, न्यू डेल्हि
6. दर्शनमाला (गुरुप्रसादं कमेन्टरी) - प्रो. एम.एच्. शास्त्री- डी. के. प्रिन्ट् वेल्ड् (पि) एल्टी डी, न्यूडेल्हि
7. दर्शनमाला (दीधिति व्याख्यानं - मलयालम्) – विद्यानन्दस्वामी- श्री नारायणधर्मसंघं ट्रस्ट्, 1962


## अधिकवाचनायाग्रन्थौ (Suggested Readings)


1. दर्शनमाला – श्रीनारायणगुरुः(मलयालम्), स्वामि विद्यानन्दगिरि,नारायणगुरुकुलम्,केरलम्।
2. दर्शनमाला ( जार्लान्ट ओफ् विषन्)- श्रीनारायणगुरुः


SGOU

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

SGOU

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

# श्रीनारायणगुरुदर्शनम्

COURSE CODE: B21SN01SE

SGOU

SREENARAYANAGURU
OPEN UNIVERSITY

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-966440-2-4
9 788196 644024